९०० / ४ (A)

1.00 / 4 (A)

'अथ'

(सप्तपदार्थीव्याख्या)

ग्रन्थनामः-	"मितभाषिणी" Mitbhashini
कर्तृनामः-	"माधवसरस्वती"
विषयः-	न्यायशास्त्रम् (वैशेषिकप्रकरणम्)

674

१२२

१००/४ 100/4

मित भाद्रशिरोकृष्णे ८ मि दं सम्पाखिलियात्र

[redacted]

॥रमापतेरिदं पुस्तकं॥

100/4

वे.टी.मि.
१

न

॥श्रीगणेशाय नमः॥ ॥वेदांतविज्ञांसुनिश्चितार्थैर्योगीश्वरैर्ध्येयमजं विशुद्धं॥ उमा
सुताभ्यामधिगम्यमानं वंदे महेशं सदनुग्रहेशं॥१॥ विघ्नेत्यादौ नमस्कृत्य माधवाख्यः सर
स्वती॥ शिवादित्यकृतेष्टीकां करोति मितभाषिणीं॥२॥ विशिष्टशिष्टाचारानुमितश्रुतिबो
धितकर्तव्यताकं कर्तव्यविघ्नविघातकं परमेश्वरनमस्कारलक्षणं मंगलमाचरन्नर्थाद्वि
षयादिदर्शयति। हेतवइति। ननु नमस्कारादिमंगलाचरणफलप्रमाणाभावादयुक्त
मिति चेन्न। फलं तावत्कर्तव्यविषयविघ्नध्वंस एव वैदुर्लीति। न त्वभीष्टसमाप्तिः। तत्र मंगलस्या
न्वयव्यतिरेकाभ्यां व्यभिचारात्। कृतेपि मंगले कादंबर्यादौ समाप्त्यभावात्। अकृतेपि मंगले
पि च नास्तिकाद्यनुष्ठितकर्मसमाप्तेः। विघ्नध्वंसे तु नैवं। यावन्मंगलं तावद्विघ्नध्वंसांगीकारात्। वि १

तीवं

र्वविद्धेतुकत्वस्यप्रसिद्धिर्वाच्येतिचेन्न। सत्यं। अस्त्यत्रापिसामान्यतःसाध्यप्रसिद्धिः। तथाहि। किंचितज्ञ
हेतुकत्वं। अहेतुव्यतिरिक्तनिष्ठात्यंताभावप्रतियोगि। व्यतिरेकिधर्मत्वात्। घटत्वादिवत्। प्रमेयत्वादौव्य
भिचारवारणायव्यतिरेकीत्युक्तं। आकाशनिष्ठात्यंताभावप्रतियोगित्वयासिद्धसाधनतावारणाया
हेतुकव्यतिरिक्तनिष्ठात्यंताभाववविशेषणं। तथाचकिंचित्सहेतुकत्वंयतोव्यावर्त्ततेतदेवसर्वज्ञहेतुकत्वे
प्रसिद्धंतद्वस्तुगत्यापक्षएवतत्रकेवलव्यतिरेकिणातद्धिएतःसाध्यइतिनाप्रसिद्धविशेषणकःपक्षः। तस्मा
ज्जगतोहेतुत्वंवदतानेनेश्वरसाधकंव्यतिरेक्यनुमानमसूचि। यद्वा। अनेनान्वयव्यतिरेक्यनुमाने
मेवसूचयत्। तथाहि। गिरिदरीविवरवर्त्तिनोंकुराः। सकर्तृकाः कार्यत्वात्घटवदिति। नन्वयंसंदिग्धा
नैकांतिकः। क्षित्यादौसंदिग्धसाध्यवतिहेतोःसत्वात्। नचनिश्चितसाध्याभाववतिहेतुसंदेहेसंदिग्धा
नैकांतिकता। अत्रत्रसाध्यस्यैवसंदेहोनहेतोरितिवाच्यं। हेतुःसाध्यात्यंताभाववद्धर्मीनवेतिसं

देहे संदिग्धानैकान्तिकता। सत्त्वसंदेहः साध्याभाववद्वृत्तिहेतुसंदेहाद्धेतुमति वा साध्यसंदेहाच्च तदत्र क्षित्यादौ
कार्यत्वहेतोर्निश्चितेपि साध्यसंदेहाद्धेतोः साध्याभाववद्गामित्वसंदेहोस्त्येव। किं चेदं सकर्तृकत्वं कर्त्रा सहवर्त्त
मानत्वं वा कर्तृजन्यत्वं वा। नाद्यः। यद्यापि सिद्धसाधनत्वात्। तथाहि। जीवानां विभुत्वेनांकुराणां तैः सहवर्त्त
मानत्वात्। भोजकादृष्टजन्यत्वेन जीवजन्यत्वाच्च सिद्धसाधनं [illegible]ने। अथोपादानगोचरापरोक्षज्ञानचिकी
र्षाकृतिमज्जन्यत्वं सकर्तृकत्वं। उपादानं समवायिकारणं तद्गोचरो विषयो यासाम् अपरोक्षज्ञानचिकीर्षा
कृतीनां तास्तथा। इदमस्योपादानमिति लिंगाद्यजन्यं ज्ञानमपरोक्षं इदं करिष्यामीति कर्तुमिच्छा चिकी
र्षा कृतिः प्रयत्नः। एता यस्यासौ तद्वान्। तेन जन्यत्वमिति विवक्षितं एतच्च नास्मदादीनामिति न सिद्धसा
धनमिति चेन्न। नैवं। सिद्धसाधनत्वादेव। अस्मदाद्यपरोक्षज्ञानादेरपि अदृष्टद्वारांकुराद्युपादान
गोचरत्वात्। तथाहि। इष्टसाधनताज्ञानस्यापरोक्षत्वेपि यागादिसाधनद्रव्यादौ प्रवृत्तिविषये अपरोक्षे ८

ज्ञानमस्त्येव। ततस्तत्र चिकीर्षाप्रयत्नौ। ततो यागादिना अदृष्टं जायते। तेन च भोजकादृष्टेन तदुपादा
नसहितेन अंकुरादिर्जन्यते। अतो यागादिनैव सिद्धसाधनमिति दुष्टमिदमनुमानमिति चेत्। मैवं
वादीः। तथा च संदिग्धानैकांतिकः। साध्यसंदेहवर्त्ती। निश्चितस्य हेतोः तथात्वाभावात्। अन्यथा स
र्वेषां हेतूनां पक्षे संदिग्धसाध्यवत्त्वे तद्धेतुत्वप्रसंगात्। तथा च सकलानुमानोच्छेदप्रसंगः। अत
पक्षे ५ एव सिद्धांतप्रवादोपि नहि पक्षतुल्ये व्यभिचार इति। अपि च पक्षसमव्यतिरिक्ते घटादौ कार्यत्वहे
तोः सकर्तृकत्वेन व्याप्यवधारणात्। स च हेतुः क्षित्यादौ पक्षसमे अंकुरत्वपक्षे वर्त्तमानः सममेवोभ
यत्र साध्यं साधयति। निश्चितव्याप्तिकस्य हेतोः संदिग्धसाध्यवति वर्त्तमानस्य साध्यसाधकत्वनिय
मात्। सकर्तृके चेदं विवक्षितं। अदृष्टाद्वारकोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वमि
ति। अदृष्टं धर्माधर्मौ तौ द्वारं व्यापारो न विद्यते यासां ताः अदृष्टद्वारिकास्ताश्च ता उपादानगोचरा

परोक्षज्ञानचिकीर्षाकृतिमत्पश्चात्तद्द्वाराजन्यत्वं सकर्तृकत्वमित्यर्थः। तथा च तनाऽस्मदादिना सिद्धसाधनं। अस्म
दादिज्ञानचिकीर्षाकृतीनां अदृष्टद्वारं विना उपादानगोचरत्वाभावेन अदृष्टद्वारकत्वाभावात्। भो
क्तृज्ञानमदृष्टद्वाराहेतुः कर्तृज्ञानं च चिकीर्षाकृतिशरीरचेष्टादिद्वारा। तथा चादृष्टद्वारकत्वविशेषणेन
भोक्तृजन्यत्वनिराकरणे कर्तृजन्यत्वेन पर्यवसानादीश्वरजन्यत्वमेव सिध्यत्यतो नैकांश्ये दोषः। ननु तथा
पि प्रध्वंसस्य कार्यत्वेऽप्युपादानकारणाभावेन तद्गोचरज्ञानादिमत्त्वाभावात्तज्जन्यत्वं नास्तीति हेतुरनैका
न्तिक इति चेन्नैव। प्रागभावप्रतियोगित्वे सति समवेतत्वादिति हेतोर्विवक्षितत्वादयं संक्षेपः। गिरि ४
दरिविवरवर्त्तिनोऽङ्कुराः अदृष्टाद्वारकोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्याः प्रागभावप्र
तियोगित्वे सति समवेतत्वात् घटवदुक्तसाधनेन तदुक्तसाध्यं यथा पटवत्सु परम्परतो विस्तरात्। जगन्नामेवेत्ये
वकारतात्पर्यं वाऽव्ययानामनेकार्थत्वात्। तथा वायमर्थः। समस्तकार्यस्य हेतुः परमेश्वरः। न ७

ज्ञानमस्त्येव। ततस्तत्र चिकीर्षाप्रयत्नौ। ततो योगादिना अदृष्टं जायते। तेन च भोजकादृष्टेन तदुपादा
नसहितेन अंकुरादिर्जन्यते। अतोऽस्मदादिनैव सिद्धसाधनमिति दुष्टमिदमनुमानमिति चेत्। मैवं
वादीः। नेनैवं संदिग्धानैकांतिकः। साध्यसंदेहवर्त्ती निश्चितस्य हेतोः सत्यात्वाभावात्। अन्यथा स
र्वेषां हेतूनां पक्षे संदिग्धसाध्यवति तिष्ठन्चेद्दुष्टत्वप्रसंगात्। तथा च सकलानुमानोच्छेदप्रसंगः। अत
पक्षे ५ एव सिद्धांतप्रवादोऽपि न हि पक्षतुल्यैर्व्यभिचार इति। अपि च पक्षसमव्यतिरिक्ते घटादौ कार्यत्वहे
तोः सकर्तृकत्वेन व्याप्त्यवधारणात्। स च हेतुः क्षित्यादौ पक्षसमे अंकुरे च पक्षे वर्त्तमानः सम्यगेवाभ
यत्र साध्यं साधयतीति। निश्चितव्याप्तिकस्य हेतोः संदिग्धसाध्यवति वर्त्तमानस्य साध्यसाधकत्वनियम
मात्। सकर्तृकत्वे चेदविवक्षिते। अदृष्टद्वारककोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वमि
ति। अदृष्टं धर्माधर्मौ तौ द्वारं व्यापारो न विद्यते यासां ताः अदृष्टद्वारिकास्ताश्च ता उपादानगोचरा

न्वे२

खुकुलालादिवत्तूक्तिपप्रस्येति।बहुवचनस्य कपिंजलाधिकरणन्यायेनत्रित्वेनापि संभवात्।अथवाप
वकारे भिंशक्रमः।हेनवाणेति नत्र चापोगान्ययोगव्यवच्छेदार्थः।जगतांहेतुत्वईश्वरस्य सदा वर्त्ततेन तुका
दाचित्कमस्तीति।एव वृक्षणिकः सर्वज्ञोजगद्धेतुः।कपिलादिर्वेदादिहेतुर्हिरण्यगर्भएवस्वतंत्रोजगद्धेतुः।प्रधानेज
नि४ गद्धेतुरित्यादिमतानिरासार्थमुक्तं।यद्वाहेतवे निमित्तकारणायैव नतुवेदांतिवदुपादानकारणमित्यसू वि
उपादानकारणत्वेकार्यस्यापिसचेतनत्वादिप्रसंगइति।संसारस्थितिहेतुत्वेनापरमेश्वरः सिध्यतीतिप्र वि५
माणांतरेतद्वाक्यस्यसूचनायाह।संसाराणवइति।संसारएकविंशतिप्रकारदुःखसंबंधः एवार्णवोदुस्तर
त्वात्।अनादित्वेनागाधत्वाद्वा।तस्यसेतवेविधारकाय।यथासेतुर्जलादेरधारः।तथासंसारिणांजगता
वाधारःस्थितिहेतुरित्यर्थः।सएषसेतुर्विधरणएषांलोकानामसंभेदायेतिश्रुतेः।सेतुशब्देनात्रसेतुगतवि
धारणत्वंलक्ष्यते।प्रयोगस्तु।जगतांधृतिःसाक्षात्सर्वपर्यायवपयत्नसाध्या।धृतित्वात्।गगनतलेपतत्रिखग

सं०टी०भि शरीरं तद्वदनगतमां सख्ञनिवत् ।पद्य॥ अस्मिन् शास्त्रे प्रतिपाद्यं मोक्षकारणत्वेन ईश्वरं दर्शयन् मोक्ष
प्रयोजनत्वं शास्त्रस्य दर्शयति संसारार्णवेति। संसारार्णवस्य दुःखसमुद्रस्य सेतुः पारः प्रापकः।यथा
सेतुः पारावारवर्त्तिनां पारं प्रापयति तथायमीश्वरोपि संसारपारस्य मोक्षस्य प्रापक इत्यर्थः॥८॥ ए
वमनोवाक्कायकर्मभिः। किं प्रमाणं त्रिविधप्रकृष्टीभावलक्षणेन भंगव्याकरणेन शिष्याणां शिक्षार्थं ग्रंथेन निब
द्धेन मंगलाचरणव्याजेन अर्थात् शिष्यप्रयोजनसंबंधाधिकारिणः समसूविषत्।ज्ञातार्थं ज्ञातसं
बंधं श्रोतुं श्रोता प्रवर्त्तते। शास्त्रादौ तेन वक्तव्यः संबंधः सप्रयोजन इति न्यायेन श्रोतृणां सुखप्रवृत्त
ये ग्रंथादौ अनुबंधचतुष्टयस्यावश्यवक्तव्यत्वात्। तदुयतेणैकदिशास्त्रस्येदं प्रकरणं। अतस्तदी
यानुबंधचतुष्टयेन वास्यापि द्रष्टव्यं। तत्र परमेश्वरो महाविषयो मोक्षश्चमहत्प्रयोजनं ।पदार्था
अवांतरविषयाः। तज्ज्ञानमवांतरप्रयोजनं। विषयशास्त्रयोः प्रतिपाद्यप्रतिपादकभावः सं ८

विषय

बंधः॥विषयप्रयोजनयोर्विषयविषयिभावः संबंधः॥शास्त्रप्रयोजनयोः साध्यसाधनभावः संबंधः॥प्रयोजन
कामोधिकारीति॥नन्वेवं शास्त्रप्रकरणयोः को भेद इति चेत्॥शास्त्रैकदेशसंबद्धं शास्त्रकार्यांतरे स्थितं॥आ
हुः प्रकरणं नाम शास्त्रभेदं विपश्चितः॥इति लक्षणकृतो भेदः॥बालबोधनं वा अंतरप्रयोजनं॥छ॥ अथ दा
नीं चिकीर्षितं ग्रंथमारभमाणः पदार्थसामान्यस्वरूपतो निर्दिशति॥ प्रमितिविषया इति॥पदार्था इति सा
मान्येनोद्देशः॥तेषां स्वरूपं प्रमितिविषया इति प्रमितिर्यथार्थज्ञानं तस्य विषया इत्यर्थः॥प्रमेयत्वमेव प
दार्थशब्दस्य प्रवृत्तिनिमित्तमित्यर्थं पदेन दर्शितं॥ननु प्रमितिविषयत्वं पदार्थसामान्यलक्षणं॥केवला
न्वयित्वेन प्रमेयत्वस्य लक्षणत्वायोगात्॥केवलव्यतिरेकी हेतुर्विशेषो लक्षणमिति॥तल्लक्षणत्वस्याभिधास ८२
मानत्वाज्ञानत्वं वा प्रमाविषयो व्याहत्यो स्तीति चेन्न॥तस्य कदाचित्प्रमेयत्वात्॥शुक्तिर्वा रजतं वा तादा
त्म्यं भ्रमविषयः रजतत्वसंसर्गो वा ते सर्वे भ्रमे पाएवो तदानीं प्रमाविषयो न भवतीति चेन्न॥तर्हि पदार्था

नै

स्य१

स०टी०मि नामेवस्मृतिविषयतासमये पदार्थत्वापत्तेः कदाचित्प्रमेयात् एवेति यदि भ्रमविषयो न तर्हि तथेति तुल्यं। किं
च पदार्थो यौगिको वा रूढो वा। आद्ये भ्रमविषयस्य पदार्थत्वात् तद्व्यावर्त्तनमयुक्तं स्यात्। लक्षणे न हि स्वरूपाद्व्य ले२
व्यावर्त्यते न तु लक्ष्यमेव। भ्रमविषये [illegible] पदार्थशब्दवाच्यत्वात् लक्ष्यादनन्यत्वेव। न द्वितीयः। रूढिर्हि सम
पदार्थमेव। सैव भ्रमस्यापि विषयः। अन्यथाप्यन्यथाख्यात्यनुपपत्तेः। अन्यत्र सद्देवान्यत्र दोषाद्भातीति सा
१५ ख्यान्यथाख्यातिः। तथा च द्वितीयेपि पक्षे सप्तपदार्थैव भ्रमविषय इति तस्यापि लक्ष्यत्वात् तद्व्यावर्त्तनैः पूर्ववद्व्या
र्थमेव। प्रमेयत्वादि[illegible]र्वृत्तिर्द्वैकीयधर्म इति वदतो वैशेषिकस्यापसिद्धान्तश्च। आकारेणादमुनेरद्यपार्थत्वप त्व४
मेयत्वाभिधेयत्वादि[illegible]धर्मः केवलान्वयीति सिद्धान्तप्रवादस्य प्रतीयमानत्वात्। ननु ग्रन्थकारः एवं प
दार्थलक्षणमुक्तमिति वक्ष्यति अतः तद्विरोध इति चेत् न तदभिहितस्यागतिं वक्ष्यामः। ननु भ्रमस्यापि न०
प्रमाविषयत्वे कथं तस्य भ्रमत्वसिद्धिरिति चेन्न। शृणु इदं रजतं त्वयोर्वैधिकरण्याद् इदं रजतत्वमिति सा ए

त१

मानाधिकरण्येनविषयीकरणात्। व्यधिकरणत्वप्रकारत्वेनभ्रमत्वमिति। तत्रग्रंथस्वरूपकथनंप्रवृत्तिनि
मित्तकथनंवेतिरुक्तमिति। केतेपदार्थाः। कियंतइतिजिज्ञासायामाहतेवेति। पदार्थाःसप्तैवेतिसंबं
धः। द्रव्यस्यसर्वपदार्थाधारत्वेसमवायिकारत्वेनचप्रधानत्वात्। प्रथममुद्देशः। गुणस्यजातीयस्यस
र्वद्रव्यादृत्तित्वात्। उत्पत्त्युत्तरक्षणमेवोत्पन्नत्वेनातिसान्निध्याच्चगुणस्यतदानंतर्यं। कर्मजा
तीयस्यनद्वैपरित्यात्। जात्याधारत्वाच्चतदानंतर्यं। सामान्यस्यानुवृत्तित्वेत्रितयगतत्वेनचब
हुविषयत्वाच्चतदानंतर्यं। विशेषस्यसमवेतत्वात्सामान्यप्रतियोगित्वाच्चतदानंतर्यं। एतेषांपं
चानांसंबंधत्वेनसमवायस्यतदानंतर्यं। षण्णांनिषेधरूपत्वेनाभावस्यतदानंतर्यमित्युद्देश
क्रमः। एवमन्यत्राप्यूहनीयं। विस्तरभयान्नातिप्रयोजनत्वाच्चनोच्यतइति। एवकारोऽयोगान्य
योगव्यवच्छेदार्थः। अत्रैतादस्येवनन्यूनमिति। अयोगव्यवच्छेदः। अन्यस्यात्रसंबंधोनास्तीत्य

स॰टी॰मि॰ न्ययोगव्यवछेदः॥तथा च शंखः पांडुर एवेतिवत्पदार्थाः सप्तैवेतिवचनस्याऽन्यासंख्याया विशेषणत्वेन
विशेषणसंगत एवकारोऽयोगव्यवछिनत्ति यदा तु पार्थ एव धनुर्धर इतिवत्सप्तैव पदार्था इति विशे
ष्यसंगत एवकारस्तदान्ययोगंव्यवछिनत्ति इत्युभयव्यवच्छेदसिद्धिर्यथाश्रुतेनैवकारेण भवति।
एवमग्रेप्येवकारो द्रष्टव्यः॥नचेति चकारो जिज्ञासानिवृत्त्यर्थः॥संख्यात्रा द्वौ विभाग सिद्धामेव संख्या
स्पष्टयति॥द्रव्याणि परिसंचष्टे नत्वेति॥तत्र सप्तसु मध्य इत्यर्थः॥गुणान्विभजते॥गुणास्त्विति॥तुशब्दः
पूर्ववैलक्षण्यद्योतनार्थः॥गुणेषु परत्वादिसंख्या नास्ति गुणेषु गुणानंगीकारात्तच्चतुर्विंशतिरित्ययुक्तं
तथापि संख्यागुणयोरेकार्थसमवायसंबंधादुपचारेण तत्र संख्याव्यवहार इति न दोषः॥कर्माणि
विशेषत उद्दिशति॥कर्माणीति॥ननु संयोगविभागपरत्वापरत्वातिरेकेण कर्मैव न पश्याम इति चेन्न
नत्वपरत्वापरत्वाद्यैः नमंधो न पश्यतीति॥चलतीत्येवमाकारणसंयोगादिविलक्षणप १०

त्यप्रत्यक्षसर्वज्ञानीनस्यान्तर्वेद्यप्रत्यक्षमिति चेन्न तत्राप्यनुभव एवोत्तरीचलनं साक्षात्कारेमीत्यनुभ
वात्॥ भ्रमणरेचनस्पंदनमध्योर्ध्वज्वलनतिर्यग्गमनेनतर्भावात्॥ नावधारणानुपपत्तिः॥ संख्यात्वोपचा
रिकी॥ उपचारस्तु संख्याकर्मणोरेकद्रव्याश्रयत्वात्॥ सामान्यं त्रेधा विविनक्ति॥ विशेषाणां विभागा
भावे हेतुमाह॥ विशेषास्त्विति॥ असंख्या अनंता इति तत्र हेतुः परमाणुनित्यद्रव्यवृत्तित्वादिति॥ यावंति नित्य
द्रव्याणि गगनादीनि पर॥ चतुर्विधाः परमाणवः॥ तत्र वर्तिनो ये ते तेषामानंत्यात्तस्मान्नित्यद्रव्याणा
मसंख्यातत्वाच्च तदाश्रिता विशेषा अपि अनंता इत्यर्थः॥ ननु नित्यगुणेषु किमिति विशेषा नाभ्युपगम्यंते॥ जा
तत्र त्यां द्यावृत्तिसंभवान्नाभ्युपगम इति चेत् हंत तर्हि जातिगुणक्रियाभिर्नित्यद्रव्याणामपि व्यावृत्तिसं
भवात्तत्रापि न तदभ्युपगमो युक्तः॥ अथ द्रव्येष्वभ्युपेयं तेन तर्हि गुणेष्वभ्युपेयतामिति चेन्न मैवं॥ नि
त्यगुणा हि जलपरमाण्वादिगता रूपादयः तेषां व्यावर्त्तकाः रूपत्वावांतरशुक्लतरशुक्लतमत्वादयः सा

स॰टी॰मि

भवंति॥ अवांतरजाति(?)व्यक्तिष्वपि विशेषाणां नाश्रित्याश्रयविशेषेण तद्व्यावृत्तिः संभवति॥ गगनात्काल
दिशोः तयोश्च परस्परं संयुक्तात्मनां च मिथो मनसां चेतरेतरव्यावृत्तिः विशेषपदार्थं विनायोगिनां
न संभवति॥ परमाणुष्वपि सजातीयपृथिवीत्वादिव्यतिरिक्तावांतरजातेरभावात्तेष्वपि समानजा
तिगुणकर्मसु मिथो व्यावृत्तेर्विशेषपदार्थं विना असंभवात्तत्रापि तत्सिद्धिः॥ कुतः परमाणुषु नावांतर
जातिरिति चेन्न॥ शृणु॥ परमाणुवृत्तिजातेरंत्यकार्यवृत्तित्वदर्शनात्पृथिवीत्वादिवत्सापि जातिर्घ
टादावपि वर्त्तेत॥ तथा चावांतरजातिः नास्मान्नित्यद्रव्येष्वेव विशेषपदार्थांगीकारेणान्यत्र नित्ये
ष्विति॥ संधुक्तं॥ यावन्नित्यद्रव्यत्वादनंता इति॥ समवायस्य विभागाभावे हेतुमाह समवायस्त्वेक एवे
ति॥ इह तंतुषु पटः इह पटे शौक्ल्यं इह चलनं पटत्वादि द्रव्यगुणकर्मजातीयप्रत्ययाः विशेषणविशेष्य
संबंधनिमित्ताः॥ अबाधितेहप्रत्ययत्वादिह कुंडे बदरमस्तीतिप्रत्ययवदि[illegible]त्यनुमानेन लाघ ११

वन्तर्कः स नाथे सएकएवसिध्यति एकेनैव सर्वत्रव्यवहारोपपत्तौ तदनेककल्पनायांगौरवादितिसम
वायेचाल सिद्धिः अभावंविभजते। अभावश्चेति। इहघटोभविष्यतीति प्रागभावः प्रतीयते। सनष्टइतिप्रध्वं
सः प्रतीयते। घटः पटोनभवतीति अन्योन्याभावः प्रतीयते। प्रतियोगी समवाय्यतिरिक्तः इहघटेपटोनास्तीति
निषेधः त्रैकालिकाभावोत्यन्ताभावः। संप्रतिपृथिवींपृथक्करोति पृथिवीति परमाणुसद्भावेप्रमाणं त्रस
रेणुः सावयवावयवारब्धः जन्यमहत्त्वाधिकरणत्वात्। घटवदिति त्र्यणुकस्यावयवो द्व्यणुके सावयवे
सनिसएवावयवः परमाणुः सोपि चेदनित्यः स्यात्। तस्यापि हेतुपरंपरानुसरणेह्यनवस्था स्यात्। तथा
चानवधिकानेकावयवारब्धं सर्वं कार्यंतुल्यमिति मशकमातंगयोरपि तुल्यपरिमाणत्वापत्तिः। तस्मा
त्सर्वकार्यद्रव्यावधित्वेन नित्यः परमाणुः सिध्यतीति। नित्यपृथिवीसिद्धिः। द्व्यणुकमपि अनेनैव सि
ध्यति। एवमग्रेपि परमाणु~~द्व्यणुक~~कल्पनाद्रष्टव्या। अनित्यायास्त्रैविध्यमाह। सापीति। शरीरमिंद्रि

न्यायर्नं

मि·स·टी· यविषयभ्यस्वरूपंस्वरूपंयस्याः सा तथा पार्थिवशरीरादिषु प्रसिद्धौ प्रमाणमाह। शरीरमिति। गन्धव्यं
जनकपदेन प्रमाणसूचितं। घ्राणं पार्थिवं रूपादिषु मध्ये गन्धस्यैवाभिव्यञ्जकत्वात् वायूपनीत
सुरभिद्रव्यकभागवदिति घ्राणस्य पार्थिवत्वं। अपो विभागं प्रापयति। आपोपीति। विरूपेणेनोक
इति आगमसिद्धिरिति शेषः। रसव्यंजकमिति रसनेन्द्रियस्याप्यत्वेऽनुमानं रसनेन्द्रियमाप्यं रूपादि
मध्ये रसस्यैवाभिव्यंजकत्वात् लालावदिति प्रयोगः। तेजो विभजते तेजोपीति। अत्रापि आदि
सालोक इत्यनन्तरं पुराणादिसिद्धमिति शेषः। इन्द्रियमिति। चक्षुरिन्द्रियं तैजसं रूपादिषु मध्ये
रूपस्यैवाभिव्यञ्जकत्वात् आलोकवत्। मनोव्यावर्त्तनायैवकारः। असिद्धिवारणाय रू
पादिष्विति। अन्यथा रूपत्वस्यापि व्यंजकत्वेनासिद्धिः स्यात् विषयस्य चातुर्विध्यमाह। विषय इति।
ननु आकरजसुवर्णं तैजसं पार्थिवं नैमित्तिकद्रवत्वाधिकरणत्वात् आज्यावदपीति गुणाधिकर १३

पात्वात् पीतपटवदिति सुवर्णस्य पार्थिवत्वसिद्धिः। कथं तैजसमिति चेत्। मैवं। तस्य पार्थिवत्वेऽत्यन्तान
लसंयोगे सति द्रवत्वविनाशापत्तेः घृतपार्थिवत्वेन घृतवद्दह्यमानत्वापत्तेश्चेति बाधकतर्क
पराहतमनुमानं तैजसत्वे चैतत्तर्कसहकृतमनुमानं। सुवर्णमपार्थिवमसति विरोधिद्रवद्रव्यसं
वधेऽत्यन्तानलसंयोगे सत्यनुच्छिद्यमानद्रवत्वाधिकरणत्वादाप्यपरमाणुवदिति पार्थिवव्यतिरे
कसिद्धौ नैमित्तिकद्रवत्वेन जलव्यतिरेकसिद्धेः रूपवत्त्वेन पारिशेष्यात्तैजसत्वसिद्धिः। वायुं विविन
क्ति। वायुरपीति। इंद्रियमिति। त्वगिंद्रियं वायवीयं। रूपादिषु मध्ये स्पर्शस्यैवाभिव्यंजकत्वादंगसं
गिसलिलशैत्याभिव्यंजकव्यजनवातवदिति त्वगिंद्रियस्य वायुत्वे मानं। कंपजनकपदेन
वायोरतींद्रियत्वमुक्तं। स्पर्शशब्दधृतिकंपलिंगगम्यत्वं सूचयामास। प्रयोगस्तु। अस्मदादिप्रत्यक्षाभा

स॰टी॰मि॰ वेसतिशाखाकंपस्पर्शो वृक्षाद्यजन्यः कंपत्वात् शरीरादिजन्यकंपवदिति परिशेषाद्वायुसिद्धिः। शरीराभ्यंतर
वर्त्तिश्वासोच्छ्वासरूपप्राणवदपानादीनामाधिक्यमाशंक्याह सएवेति। कालएव अपानव्यानोदानसमा
सं॰ नेनाम लभत इत्यर्थः। ननु स्तिमितवायुः पंचमोस्तीति अत आह स्तिमितेति स्तिमितवायुः परमाणुरूपः
सूक्ष्म इत्युक्ते। पंचविधकार्यत्वविपिन दोषः कार्यस्य परमाणुरूपत्वसंभवात्। परमाणूनामेवपरपरयाकार्यो
त्वात्। अत आह। अनारब्धेति। अनारब्धद्रव्यत्वेन सतथायद्यपि स्तिमितवायोः परमाणुरूपत्वे
व्यजनादिव्यापारानंतरं तद्दीपस्पर्शो न गृह्येत परमाणुस्पर्शत्वेनातीन्द्रियत्वात् तथापि तदीयस्पर्शा
नुपलंभेपि व्यजनादिव्यापाररूपनिमित्तसहकारित्वाभावात् आरब्धकार्यस्य स्पर्शोपलंभाददोषः॥
तस्मान्नित्यवायावेवतस्यांतर्भाव इति नाधिकत्वं। आकाशस्य स्वतएकत्वेपि उपाधिकोविभागोभवि
ष्यतीत्याशंक्य तदभावे हेतुमाह। घटाकाशादीति उपाधीनां अनंतत्वादौपाधिको विभागो न भवती २२

नि॰

त्यर्थः। कालस्यौपाधिकं विभागमाह। उत्पत्तीति। पदार्थानामुत्पत्तिस्थितिनाशैर्लक्ष्यत इत्युत्पत्तिस्थितिविना
शलक्षणः। उत्पत्त्या भविष्यत्स्थित्या वर्त्तमानः। विनाशेन भूतकालो लक्ष्यत इति त्रिविध इत्यर्थः। दिशमुपाधी
न्विभजते। दिगिति। सर्वत्र देवतार्थे इदमर्थे तद्धितप्रत्ययः। रिद्गुणत्वे स्यादिना ङीप्। अस्मेर्द क्रियमाण्यदि
ति विशेषः। ऐंद्री अंतरिक्षपदे उक्तः। गगनादीनां स्वाभाविकभेदाभावे हेतुमाह। आकाशादीति। आकाशस्या
व शब्दलिंगकं। शब्दाश्च सर्वे समानाधाराः। तथा हि। विवादाध्यासिताः शब्दाः श्रूयमाणशब्दाधारसमवे
ताः शब्दत्वात् श्रूयमाणशब्दवत्। न च श्रूयमाणशब्दत्वमुपाधिः श्रूयमाणस्य साधनव्याप्तिपरिहा
रार्थत्वेन पक्षेतरत्वात्। श्रूयमाणशब्दाधारसमवेतसंयोगादौ साध्याव्यापकत्वाच्च। दिक्कालयोरपि
परत्वापरत्वानुमेयत्वेन सिद्धावेकत्वसिद्धिः। तथा हि। तरणिपरिस्पंदलक्षणाहोरात्रादिबहुलीत्या

स॰टी॰मि॰ भ्यां विशिष्टे पिण्डे परापरबुद्धिर्जन्यते । तरणिपरिस्पन्दस्य सूर्यसमवेतत्वेन स्वतः पिण्डसंबन्धाभावात् सूर्य
स्य च मूर्तत्वेन आश्रयद्वारापि संबन्धाभावात् न च पृथिव्यादीनां तत्संबन्धघटकता मूर्तत्वात् आत्मा
काशयोः विशेषगुणवत्त्वेन घटादिवत् दधृत्वात् । ततस्तरणिपरिस्पन्देन संयुक्तसमवायिलक्षणः संयुक्त २
संबन्धः दिगपि अनियतपरत्वापरत्वाभ्यां प्रमावप्रकृष्टसंनिकृष्टदेशावच्छिन्नपिण्डसमवेताभ्यां अनुमीय
ते । तथा हि । कालस्य ज्येष्ठत्वकनिष्ठत्वादिनियतपरत्वापरत्वबुद्धिहेतुत्वेन सिद्धस्य अनियतपरापर
घ४ बुद्धिहेतुत्वासंभवात् । तस्याकत्वेन सिद्धं यद्वस्तु सा दिक् । दिक्कालयोरैक्ये केकत्वेन व्यवहारोपपत्तौ क
दे ल्पनाभेदेन व्यवहारभेदे नवानेककल्पनायां मानाभावात् । आत्मपदार्थं विभजते । आत्मेति । ननु
अष्टद्रव्यातिरिक्त आत्मपदार्थ एव नास्तीति कथमयं विभागः । तथा हि । कार्याकार्यपरिज्ञानदृपि
व्यादिचतुष्टयमेवात्मपदार्थः । तत्रैव चैतन्यं । ननु यदि भूतेषु चैतन्यं तर्हि घटादेरपि चेतनत्वापत्तिरिति १४

सटी·मि·

णुकयोर्महत्त्वदीर्घत्वे आकाशादौ कुम्भ[illegible]कादौ अणुह्रस्वव्यवहारो गौणः ॥ पृथक्त्वमिति ॥ अनेकु
वृत्तिर्द्विपृथक्त्वादि संयोगेति स्थाणुश्येनयोरन्यतरकर्मजः ॥ मल्लयोर्मेषयोरुभयकर्मजः ॥ तंतुकेशसंयो
गात्पटकेशसंयोगः संयोगजः ॥ तथाहि । पटारंभकतंतुकेशसंयोगः कर्मजः ततः पटोत्पत्तौ केशपटसं
योगो न कर्मजः उभयत्राप्यनन्तरकर्माभावात् किंतु तंतुकेश एव संयोगे हेतुः ॥ विभागोपि संयोगवदने
कः ॥ परत्वमिति ॥ वृद्ध[illegible]तरुणयोः परत्वापरत्वे कालकृते संनिकृष्टेऽपरत्वं विप्रकृष्टे परत्वं दिक्कृ
तं तयोर्हि कालवृ[illegible]दिक्कृतमन्यत्वं पुरस्तादेव प्रसाधितं बुद्धिभेदानाह बुद्धिरपीति प्रमानिरू
पकत्वात्पुरस्ताद्विभेदामप्यप्रमां सूचीकटाहन्यायेन प्राग्विभजते ॥ अप्रमापीति ॥ ननु सर्वज्ञाना
नां यथार्थत्वात्संशयविपर्ययाभावो कुपंतर्हि त्रिभाग इति प्राभाकरः ॥ मैवं ॥ ज्ञानत्वं यथार्थमात्र
वृत्ति सा न मात्रवृत्तित्वात् प्रमात्ववदिति । यथार्थत्वं तद्वति तत्प्रकारकज्ञानत्वं ॥ तेन बृहेन ज्ञानविष १८

चेतना मदशक्तिवद्विशेषात् यथा क्रमुकफलपत्रचूर्णप्रत्येकं मदजनकत्वाभावेपि समुदाये तज्जनकत्वं
पत्रचूर्णानां तथा पृथगाकारे तदभावेपि शरीराकारपरिणतेभूतचतुष्टये चैतन्योपपत्तेः। प्रमाणं च। अहं स्थू
लः कृशः कृष्णो गौर इति शरीरसामानाधिकरण्यप्रत्यक्षमेवानतं पृथिव्याद्येतन्मात्रवादात्मपदार्थस्यो
तिरिक्तविभागो न युक्त इति चेन्न तदसारं। शरीरात्मत्वे बाल्ये दृष्टं कौमारादौ न स्मरेत् बाल्यकौमारादौ शरीराणां
मप६ पावकद्व्याभावेपि परिमाणभेदेन भेदात्। अन्यानुभूतस्यान्येनास्मरणात्। नहि चैत्रेणानुभूतं मैत्रः स्मर
ति। ननु क्रमुदयनावयवैर्नान्यदृष्टस्मरणस्यान्यो नैकमूर्त्तैकमात्। वासनासंक्रमो नास्ति न च गत्यंतरं स्थिरे इति।
अपक्रमो विनाशः वासनासंस्कारः। किंच शरीरं नात्मा रूपादिमत्वात् घटवत्। न चाचेतनत्वमुपाधिः। रू
पादिमत्वेन शरीरस्याचेतनत्वेनोपाधेः साधनव्यापकत्वात्। हेतोरनुकूलस्तर्कः स्मृत एव बाल्ये दृष्ट
मित्यादिना। सामानाधिकरण्यप्रत्ययस्त्वभ्रांतः यौक्तिकबाधसद्भावात् ममशरीरं भेदप्रत्ययाच्च। तस्मात्

स॰टी॰मि॰

शरीरमात्मा॥ तथाप्यतिरिक्तात्मसद्भावे किं मानमिति चेन्न। एकः सर्ववस्तुकः एव परिशेषः अपरं चानुमानं इच्छा
क्वचिदाश्रिता गुणत्वाद्रूपवदिति। इच्छा गुणो विशेषगुण इति वा। अनित्यत्वे सत्येकेन्द्रियग्राह्यत्वाद्रूपवत्।
न चेच्छायाः पक्षीकृतत्वान्नेश्वरेच्छायां भागासिद्धिः। आत्मनो नित्यत्वात् प्रभायाश्च गुणत्वान्न व्यभिचारः।
द्रव्यत्वे वा अचाक्षुषप्रत्यक्षविषयत्वादिति विशेषैकव्यान्तदाकाशवदिति दृष्टान्तः। एकं चेद्यः। सा तु न भूतपञ्च
कगुणः। नापि दिक्कालमनसां मनसो व्याप्यत्वात्। विशेषगुणत्वाद्धेत्युत्तरत्र हेतुः एवमितरबाधसह
कृतेन सामान्यतो दृष्टेन व्यतिरिक्तात्मसिद्धिः। पक्षाद्युत्तरबाधप्रदर्शनात्तत्र इच्छा अदृष्टद्रव्यातिरिक्त
व्याश्रिता। अदृष्टद्रव्यानाश्रितत्वे सति गुणत्वाद्रूपं तत्त्वेवं तत्त्वे वं यथा रूपादिति व्यतिरेकिणात्मसिद्धिरिति
पुरुष एवं तस्य विभागः। क्षेत्रज्ञानां विभागाकरणे हेतुरनन्तात एव निम मनसोऽपि विभागाकरणे हेतुमाह।
प्रत्यात्मेति। आत्मनो प्रतिशरीरं भिन्नत्वे नानात्वे चेन्निष्ठं मनोऽप्यनेकमित्यर्थः। ननु मनसः सर्वदा स्पर्श २५

रहितद्रव्यत्वे न विभुत्वात्। कथमात्मनिष्ठत्वमिति चेन्न। युगपज्ज्ञानानुत्पत्तिलक्षणधर्मिग्राहकमाने
नाणुत्वस्य सिद्धेः। नवानामपरं विभागमाह। आकाशादीति। नित्यानित्यपरमाणुकार्यभेदादित्य
र्थः। रूपादीनामवान्तरविभागं दर्शयति। रूपमिति। सीनादीनां आश्रयव्याप्यवृत्तित्वेनाव्याप्यवृत्ति
त्वायोगात्। चित्रपटस्याप्यनुभवाज्जातिसत्त्वमेकरूपमास्थेयमिति मत्वाह। चित्रभेदादिति। न चापि तत्त्वे
शुक्लमेव रूपं शुक्लं भास्वरमेव तेजसि। इतराणि भूमावेव पाकजानि च। रसोपीति। मधुरः शर्करा
दौ तिक्तो निम्बादौ कटुर्मरीच्यादौ कषाय अम्लकयादौ। आम्ल आम्रादौ लवणः प्रसिद्धः। षड्रसा
हरीतक्यामिति। चित्ररसानुभवमवलम्ब्याह। चित्रभेदादिति। न चापि तत्र मधुर एव रसो हरीतक्यां च भिन्ना
ग्याः पाकजः। इतरे तु भूमावेव पाकजैकाः। गन्ध इति। सुरभिश्चन्दनादौ असुरभिर्मद्यादौ। शीतस्पर्शो जले।
उष्णस्तेजसि। अनुष्णाशीतो वायौ भूमौ सह एव पाकजः। परिमाणमिति। अणुत्वं ह्रस्वत्वं परमाणुद्व्य

त्वंततो यथार्थत्वेऽभवदस्मत्पितृत्वंमनेन व्याप्नोतीति हेतौ तु भ्रमेयत्वाद्दोषो व्यभिचार ×२

यत्किंचित्पदत्वादिकमुच्यते तेनतेन घटत्ववति घटे घटत्वप्रकारकज्ञानं यथार्थमित्यर्थः। भ्रमे तु नैवं पुरोवर्त्तिनि शु
क्तिशकले रजतत्वस्याभावेन रजतत्ववति रजतत्वप्रकारकत्वाभावात् किंतु रजतत्वाभाववति शुक्तिश
ब कले रजतत्वप्रकारकत्वात् नोयमात्रपदं न स्यादयुक्तो विभाग इति चेत्। उच्यते। प्रत्यक्षविरुद्धं तावदनुमानं। अह
मत्र संशये समात्र संशयः समजनीति संशयानुभवात् तथा शुक्तिकामिमामहं सेतोवं तत्काले रजतमि
त्यभिज्ञासिषमिति विपर्ययानुभवात् तथा च कालात्ययापदिष्टमनुमानं। तथाप्ययथार्थसद्भावे किं प्र
माणमिति चेत्। एकं तावद्धर्मिनि प्रत्यक्षं। अपरं च अनुमानं ज्ञानत्वं अयथार्थवृत्ति सकलज्ञानवृ
त्तित्वात् सत्तावत्। न च साध्यवैकल्यं अयथार्थव्यवहारे गुरुमतेऽपि स्मृतेः सद्भावेन संप्रतिपन्नत्वात् सा
ध्यस्य। न चानुभवत्वादौ व्यभिचारः तेषां सकलज्ञानवृत्तित्वाभावात्। न च ज्ञानान्यवृत्तित्वमुपाधिः
स्मृतेरयथार्थायापि सद्भावेन स्मृतित्वस्यायथार्थवृत्तित्वेऽपि ज्ञानान्यवृत्तित्वाभावेन साध्याव्याप

स.टी.मि

कत्वात्। तस्मादयथार्थज्ञानसत्वात्फलेऽयमप्रमा। विभागः। प्रमां विभजते। प्रमेति। सन्नविधईश्वरादिभे
देन निवक्षति। लिंगस्य त्रैविध्यमाह। केवलान्वयीति। क्रमेणोदाहरणानि। शब्दोभिधेयः प्रमेयत्वा
त्पटवत्। जीवच्छरीरं सात्मकं प्राणादिमत्वात्। नयदेवं तन्नैवं पाषाणादीति। अनित्यः शब्दः कार्य
त्वात्। यत्कार्यं तदनित्यं यथा घटः। यदनित्यं न भवति तत्कार्यं न भवतीति यथा गगनमिति। त्रिवि
धस्यापि द्वैविध्यमाह। तदपीति। यत्रस्वयमेव लिंगंदृष्ट्वा लिंगिनं जानाति तत्स्वार्थं। यत्रस्वयं नि
श्चित्यपरं बोधयितुं पंचावयववाक्यप्रयोगः तत्परार्थं। पंचावयवानाह। परार्थांगानीति। क्रमेणो
दाहरणानि। पर्वतोयमग्निमान् धूमवत्वात् महानसवत् तथा चायं धूमवान् तस्माद्वह्निमानिति। स्वा
र्थपरार्थगान्याह। उभयांगानीति। पक्षे व्यापकवर्तमानत्वं पक्षधर्मत्वं। सपक्षे व्याप्यैकदेशेवासत्वं।
सपक्षेसत्वं। विपक्षसर्वस्मिन्नवर्तमानत्वं। विपक्षाद्व्यावृत्तिः। पक्षेसाध्यस्य प्रमाणान्तरेणाबाधविरहो १७

बाधितविषयत्वे।असन्प्रतिपक्षोयस्यतस्यभावस्तत्वं।साध्याभावसाधकमनुमानंविरहितत्वमि
तिपावत्।अनुमानपरिशोधनायाह।तदाभासाइति।व्याप्तिःपक्षधर्मताविशिष्टोहेतुःसिद्धः।तद्रहि
तोऽसिद्धः।सचपक्षाभावादाश्रयासिद्धः।पक्षधर्मताभावात्स्वरूपासिद्धः।व्याप्त्यभावाद्व्याप्यत्वासिद्ध
इतित्रेधा।क्रमेणोदाहरणानि।गगनारविंदंसुरभिअरविंदत्वात्सरोजारविंदवत्।अनित्यःशब्दः
चाक्षुषत्वात्।विमतंसर्वंप्रमेयत्वादिति।साध्यसाधनायप्रयुक्तोयद्धेतुस्तद्विपरीतंसाधयतितद्
विरुद्धः।यथाशब्दोनित्यःकृतकत्वात्।अमुनानित्यस्यानिषेधेनशब्दोनिश्चयपवादी।एकेनैवसा
ध्यरूपेणान्तःसहचारनिश्चयोनविद्यतेसोऽनैकान्तिकः।सचत्रिविधः।यथा।नित्यःशब्दःप्रमेयत्वादि
तिसाधारणानैकान्तिकः।नित्याएथिवीगंधवत्वात्इत्यसाधारणः।सकलसपक्षव्यावृत्तत्वात्।सर्व
मनित्यंप्रमेयत्वादितिअनुपसंहारी।व्याप्त्युपसंहारस्थानाभावात्।अत्रैषट्हेत्वाभासेपक्षेसाधार

स॰दी॰मि॰ एवानध्यवसितत्रुच्यते साध्याध्यवसानाय निश्चयाय नालमित्यनध्यवसितः स च षट्हेत्वाभासा
२४ नस्यपगतो वायमिष्टयुक्तः। उदाहरणं तु पृथिवी नित्या गन्धवत्त्वात्। अत्र सपक्षादाकाशादेः विपक्षाज्ज
लादेर्व्यावृत्तत्वेन साध्यस्य निश्चितुमशक्यत्वादनध्यवसितत्वमिति। कालस्यात्ययेऽपगमेऽपदिष्टो निर्दि
ष्टः कालात्ययापदिष्टः। यथा अनुष्णस्तेजोवयवी कृतकत्वात् घटवदिति प्रयोगे वह्नेरनुष्णत्वे यो व्याप्तिग्रहणस
मये एवं प्रत्यक्षेणानुष्णत्वप्रतियोगि न याउष्णत्वं वह्नेरवधारणीया प्रतियोगिनिरूपणे विनाऽभावनि
रूपणासम्भवात् ततो बलवता व्याप्तिग्रहकेणैव प्रत्यक्षेण तेजस उष्णत्वमेव धारितं तस्यानन्यनिष्ठत्वासंभ
वात्। तथा च प्रत्यक्षेण विपरीतनिश्चये सति तद्विरोधेनानुमानकालस्य अत्यये प्रयुक्तत्वादस्य कालात्य
यापदिष्टत्वं न चाश्रयासिद्धत्वमेव तेजसः साध्याभाववत्त्वेन निश्चितत्वात्। संदिग्धसाध्यान्वित
पक्षस्यासम्भवात् पक्षस्यैव विपक्षत्वेनानैकान्तिक एव वा। अतो नायं बाधितापरपर्यायः कालात्य १८

बाधितविषयत्वं। असत्प्रतिपक्षोपस्थापनस्याभावस्तत्त्वं साध्याभावसाधकमनुमानविरहितत्वमि
ति यावत्। अनुमानपरिशोधनायाह। तदाभासा इति। व्याप्तिः पक्षधर्मताविशिष्टो हेतुः सिद्धः। तद्रहि
तोऽसिद्धः। स च पक्षाभावादाश्रयासिद्धः। पक्षधर्मताभावात्स्वरूपासिद्धः। व्याप्यत्वाभावाद्व्याप्यत्वासिद्ध
इति त्रेधा। क्रमेणोदाहरणानि गगनारविंदं सुरभि अरविंदत्वात् सरोजारविंदवत्। अनित्यः शब्दः
चाक्षुषत्वात्। विमतं सर्वं प्रमेयत्वादिति। साध्यसाधनाय प्रयुक्तो यदि हेतुस्तद्विपरीतसाधकस्तदा
विरुद्धः। यथा शब्दो नित्यः कृतकत्वात्। अमुगनाविहस्मानिष्वतेन शब्दो निश्चयवाची। एकेनैवं सा
ध्यरूपेणातः सहचारनिश्चयो न विद्यते सोऽनैकान्तिकः सव्यभिचारः। यथा। नित्यः शब्दः प्रमेयत्वादि
ति साधारणानैकान्तिकः। नित्यानित्यवृत्तित्वात्। इत्यसाधारणः। सकलसपक्षव्यावृत्तत्वात्। सर्व
मनित्यं प्रमेयत्वादित्यनुपसंहारी। व्याप्त्युपसंहारस्थलाभावात्। अत्र षट् हेत्वाभासपक्षे साधार

स.टी.सि. स्यर्थः। सांसारिकत्वाद्वैतदुःखमिश्रितस्योक्तेः। दुःखस्य सर्वस्यापि सांसारिकत्वान्न भेदेन कथनमा
त्रपदेन नात्रसांकल्प्यं वाच्यते। इच्छाद्वेषयोः सुखदुःखविषयत्वं साध्यविषयत्वं। अग्निहोत्रादिचंदनादि
कंटकादिविषयत्वं साधनविषयत्वं प्रयत्नः त्रिविधः। विहितनिषिद्धउदासीनभेदात्। निषिद्धं क
लंजभक्षणादि। उदासीनं लौकिकभोजनादि। नानाविषयोपस्य सत्वथात्रैधाद्वित्यर्थः। समाहारस्य
नमा५ रूपमिवरूपं यस्य तत्तथा। एकैकमात्रापेक्ष्यपारमाणुकस्य गुरुत्वाधिकरणदृष्टेनात्। ननुः समाहाररूपगु
रुत्वमौपाधिकमित्यर्थः। ननु गुरुत्वमनेकवृत्ति द्रव्यसमाहारमात्रादाधिक्योपपत्तेः। नव्यास्सत्वद्वत्ति
त्वांगीकारः। एकावयविनिएकद्रव्यनिष्ठं अवयविपदेन द्रव्यस्य विवक्षितत्वात्। अस्यथापरमाणुगुरु
त्वसंग्रहोनस्यात्। तथाचैकद्रव्यनिष्ठगुरुत्वाद्यापाममनेकेषां समाहाराद्गुरुत्वमपिसमान्हतमिव
द्रश्यत इति। सांसिद्धिके स्वभावसिद्धंमितिसंचित्तिसमनंतरमेपोत्व.. मितियावत्तेल्वमिष्टं। २०

प्यापदिष्टइतिचेन्न।सत्यं।तथापिसाध्याभावप्रमामंतरेणासिध्यानवगमात्साध्याभावरूपबा[illegible]वस्यो
पजीव्यत्वात्पृथक्त्वं।तथाप्यसंकीर्णोदाहरणंकिमितिचेन्न।श्रूयतां।अयंपर्वतोऽग्निमान्धूमवत्त्वादित्येत
देवानुमानंअत्रमहानसीयोऽग्निःपर्वतेवाधादेवनसिध्यतीत्यसिध्यादेरत्राभावात्।अकोऽन्यदीयाव
ह्निरन्यत्रसाध्यमानःकालात्ययापदिष्टत्वादेवनसिद्ध्यतीतिबाधकालात्ययापदिष्टयोःपर्यायत्वेनैवसाध्या
भाववत्त्वेनयावप्रमितेपक्षेउभयोःप्रयोगात्प्रकरणयोश्चकृतयोःसाध्यतदभावयोःसमःप्रकरणसमःसा
ध्यविरोधित्वेनतदभावस्यापिप्रकृतत्वात्।उदाहरणंतु।अनित्यःशब्दःपक्षसपक्षयोरन्यतरत्वात्नित्यःशा
ब्दःपक्षसपक्षयोरन्यतरत्वात्सपक्षवदिति।ननुव्याप्यारोपव्यापकारोपस्तर्कः।यथाधूमानुमानेधूमो
स्तुवह्निर्माभूदितिवह्न्यभावस्यव्याप्यस्यप्रतिवादिनाऽङ्गीकारेपेक्षतेयद्यनग्निःस्यात्तर्हिनिर्धूमोपिस्यादि
तिधूमाभावस्यव्यापकस्यारोपः।सचकिमितिनोद्दिष्टं।तथास्वप्नोनामनिद्रादुष्टमनोजन्यज्ञानंसचकुतो

नोद्दिष्टइत्यत आह।तर्केति।तर्कस्यापिसंशयएवयद्यपिनवह्निःस्यात्तर्हिनिर्धूमःस्यादित्यत्रयद्यपिलिंगितत्वेनाग्निम
त्वेधूमवत्त्वंसमवृत्तीत्रैवप्रतीयतेअतोऽग्नित्वानाग्नित्वकोटिद्वयविषयत्वाद्वयपह्यादृश्यतेवधूमस्तस्मादग्नि
रस्त्येवेतिविपर्ययपर्यवसानात्तस्तर्कः।नत्वत्रनस्यादग्निरेवेतिकोटिद्वयस्यास्पष्टत्वात्मास्वन्मस्तकगगनभक्षण
यविद्यमानविद्यमानत्वेनासन्निहितगगनादिसंनिहितत्वेदर्शयन्तुविपर्ययपर्यवसानलक्षणाकांतत्वात्।नन्व
यघटइतिविशिष्टसंकल्पकज्ञानेष्वथमाक्षसंनिपातजंज्ञानंनिर्विकल्पकमेतद्वयंकुतोनोद्दिष्टमित्यत आह।
सविकल्पकेऽनारजतएवेदंरजतमितितसविकल्पकंतुप्रमायामेवान्तर्भावइति।अरजतेरजतज्ञानंभ्रमइ
त्यर्थः।निर्विकल्पकंतुप्रमायामेवान्तर्भावइति।तस्यप्रथमाक्षसंनिपातस्यस्वरूपमात्रविषयकस्यकल्पबा
धात्।सर्वज्ञानंधर्मिण्यभ्रांतंप्रकारेतुविपर्ययइतिन्यायात्।निर्विकल्पकस्यप्रकाराभावात्।ननुसायदेव
दत्तइत्यतीतदेशकालविशिष्टकालविशिष्टविषयज्ञानंप्रत्यभिज्ञानंइत्येवस्मृतिविषयेइदंत्तात्वमितित्वात् ३९

मुपादानबुद्धिः। अनिष्टसाधनमिति हेयबुद्धिः। उभयरहितेषूपेक्षाबुद्धिः। एतच्चतुष्टयं कुतो नोद्दिष्टमित्य
त आह एवमिति। प्रमायामप्रमायां चान्तर्भावद्वित्येवंशब्दार्थः। अप्येवमित्यन्वयः। बाधिता नाम प्रमायाम
बाधिता नाप्रमायामिति विभागः। ननु बाल्यादौ परिदृष्टे पुरुषेणानेन भवितव्यमित्यूहज्ञानं किंसंज्ञकोयमू
ह्यरूपमध्यवसायज्ञानं। अनयोः कुतो नोद्देश इत्यत आह अत्रैवेति। अन्तर्भावद्वित्रैषंनुहस्यपुरुषेणाभ
वितव्यं नभवितव्यमस्त्यत्र कोटिः स्फुरतीति संशयत्वं क्रमेव। किंसंज्ञकोयमित्यत्रापि इत्थं वपकोवे वि
विकल्पस्फुरणादनध्यवसायोपि संशयत्वमेवेत्यर्थः। ननुतर्कादीनांक्वगुणेष्वन्तर्भावइतिचेत्तर्हिसंल्लक्षणे
नैव तेषां लक्षीकृतत्वात्। नह्यथकुलक्षणाभिधानं युक्तं। अन्तर्भावनीयतर्कादिज्ञानाय तल्लक्षणकथन
१२ नेन सुखादेरपि ह्यचां। नार्हेज्जरतीन्यायोयुक्तं इतिचेत्। न। सुखादेस्पष्टत्वेन लक्षणानभिधानात् तद्धि परी
तत्वेनान्येषां तदभिधानानहत्। क्रमप्राप्तं सुखं विभजते। सुखमिति। ऐहिकं पारलौकिकं चेति द्विविधमि

स·टी·मि

इत्यर्थः॥प्रकारांतरेणैतेषां विभागमाह॥संयोगेति॥उभयरूपा इति॥ईश्वरे व्यापकाः॥अनीश्वरा मि
ति अव्यापका इत्यर्थः॥अन्ये रूपादयः आश्रयव्यापकाः॥स्वाधारमभिव्याप्य वर्तंत इत्यर्थः॥विहिता इत्युत्
क्षेपणादीनि॥अदृष्टप्रक्षेपणादयः॥निषिद्धा इति॥मूत्रप्रक्षेपणादीनि॥उदासीना इति॥यावप्रक्षेपणादीनि॥
सामान्यस्योक्तं विभागमाह॥सामान्यमिति॥तत्र सत्ता जातिः॥परैव व्यापकत्वात्॥द्रव्यत्वादीनि
घटत्वादीनि अपेक्षया परापराणि॥गुणत्वादीनि नीलत्वाद्यपेक्षया परापराणि॥कर्मत्वादीनि स्वावान
तास रपेक्षया परापराणि॥सत्तापक्षया न्यूनानि अपराणि॥घटत्वादीनि अपराण्येव॥सत्त्वादीनि जातिरूपा
णीत्यर्थः॥कर्मत्वादीत्यादिपदात्पृथिवीत्वादिग्रहः॥एते पाकादिक्रियासंबंधात् पावकत्वादौ औ
पाधिकमित्यर्थः॥प्रागभावादीनां विभागाभावे हेतुमाह॥प्रतियोगीति॥प्रतियोगिनामनंतत्वाच्चेद
भावादयोऽप्यनंता इत्यर्थः॥ननु मध्यत्वं नाम पदार्थोऽतिरिक्तः कुतो नोद्दिष्टमित्यत आह॥मध्यत्वमिति ॥२१॥

सन्निकृष्टत्वविप्रकृष्टत्वयोः परापरबुद्धिकारणयोरभावे मध्यत्वबुद्धिर्जायमानत्वात् तस्याभावे चर्माव
इत्यर्थः ॥ न्धन्धकारः पदार्थान्तरं वरीवर्तीति सनत्वावन्नगुणादिषट्कान्तर्गतः रूपवत्वात् क्रियावत्वाच्च ।
गुणादीनां तदभावात् ॥ तदयुक्तं प्रशस्तपादभाष्ये गुणादीनां निर्गुणत्वनिष्क्रियत्वेइति ॥ नाप्या
काशादिपञ्चकं तत एव मनो व्याहृतिस्करूपवत्वाद्देवा नापि पृथिव्यादिचतुष्टयां स्पर्शरहितत्वा
न्नानवानुद्भूतस्पर्शकल्पनाः । कल्पकत्वाभावात् ॥ नवरूपत्वमेव कल्पकं रूपवतः पृथिवीविज्ञानी
य स्पर्शपुद्भूतस्पर्शवत्वनियमात् ॥ नमसि चक्षुपिस्पर्शानुभवत्वाभावात् ॥ अनुद्भूतस्पर्शस्या
नुद्भूतत्वकल्पनायोगात् ॥ तस्मात् इत्थमंद्रव्यमंधकारः ॥ एवं कुतो नोद्दिष्टं इत्यत आह अंधकारेति ॥ अप
माणायः ॥ पृथं चकारो भावरूपस्यात् तदा आलोकनिरपेक्षचक्षुर्ग्राह्यो न स्यात् ॥ न च तेजसः तेजोन्तरा
नपेक्षत्वेपि चाक्षुषत्वात् ॥ तत्र व्यभिचारः ॥ तत्राप्यवयविग्रहे चक्षुःस्तदयवेवापेक्षणात् ॥ अणुके तद

स॰टी॰मि॰ भावदृत्तिचेन्न।तत्रापिनालोकतरणतन्सौरकिरणापेक्षानु।अतोयोयश्चाक्षुषोभावरूपःसआलो
कनिरपेक्षचक्षुर्ग्राह्योनभवतीत्यापाद्यापादकयोर्व्याप्तिर्ग्राह्या।तस्मादालोकाभावत्वेनाध
कारःप्रमाणंतु।अन्धकारोभावःआलोकनिरपेक्षचक्षुर्ग्राह्यत्वात्।आलोकाभाववदिति।
नन्वभावोपिघटाद्यभाववदालोकनिरपेक्षचक्षुर्ग्राह्योनस्यादितिचेन्न।अभावग्रहेप्र
तियोगिसत्वस्यानपेक्षितत्वादिति।प्रतियोगिनिसन्निकृष्टभावग्रहएवनस्यादिति।नहि
घटेसन्निकृष्टेनभावोगृह्यते।अतःआलोकस्याधकारप्रतियोगित्वात्तदभावेपितमसश्चा
क्षुषत्वंनदोषाय।रूपन्तुइन्द्रनीलगतंस्मर्यमाणमारोप्यते।शुक्लत्वाभावआरोपसादृश्य
किंयाकाचादिगतमारोप्यते।अतस्तत्प्रत्यानद्रव्यत्वसिद्धिः।ननुशंकिः पदार्थान्तरमस्तितत्र
मानं।अयवाहू शब्दमाणानां×द्वाहानुरल्ललातीन्द्रियादृष्टधर्मसमवायीद्रव्यजनकला २२

नैमित्तिकमग्निसंयोगाज्जन्यमानं घृतादिपार्थिवनिष्ठं सुवर्णादि तैजसनिष्ठं वा॥ स्नेहः स्वाभाविको
जले औपाधिकस्तैलादौ जलसंबंधेनात्र प्रतीयमानत्वात्॥ वेगः शरादौ भावनानुभवजन्या स्मृ
तिजनिका आत्मनिष्ठा॥ स्थितस्य पूर्वं विद्यमानस्य वस्त्रादिविशेषस्य स्थापकः स्थितस्थापकः यथा पट
दौ वेष्टनक्रियादिजनकः॥ इष्टे पुरुषं प्रवर्त्तयति स प्रवर्त्तकः॥ अनिष्टाद्यो निवर्त्तयति स निवर्त्तकः॥
फलमवसानं अंतो यस्य स तथा अदृष्टं प्रायश्चित्तस्य कर्मणो भोगाद्वे क्षयात्॥ नमस्कारेण मं
गलमुत्पन्नेनेन प्रतिबंधकदुरितरूपा धर्मनाशः॥ आदिपदात् स्नानयज्ञाग्निचान्द्रायणादिकृत्यो वा कृते प्रायश्चि
त्ते ब्रह्महत्यादिरधर्मो नश्यति वर्णात्मको गकारादिः॥ अवर्णात्मको मृदंगध्वन्यादिः॥ गुणानाम
नित्यत्वरूपेण परविभागमाह नित्येति॥ अन्येति॥ रूपरसस्पर्शसंख्यैकत्वैकपृथक्त्वगुरुत्वस्नेहाः
परमाणुगता नित्याः कार्यगता अनित्याः॥ बुद्धिदुःखेच्छाप्रयत्नाः ईश्वरगता नित्याः॥ जीवगता नाऽनित्याः

स·टी·मि· ननु ज्ञानो घट इत्यादौ ज्ञाने ज्ञानस्य घटादिविषयनिष्ठं ज्ञानतादात्म्यं पदार्थांतरप्रसक्तं। तद्व्युदासमित्यत आ
ह। ज्ञानेनेति। ज्ञानविषययोः संबंध एव ज्ञानत्वं तदतिरिक्तत्वे मानाभावादित्यर्थः। ननु गोसदृशो ग
वय इत्यादौ सादृश्यपदार्थांतरमस्त्विति बुद्धिः स्यादित्यत आह। सादृश्यमिति। गोसदृशे गोगतत्व
गित्वादि गवयगतं तद्भेदोपाधिकं सामान्यं तद्बुद्धिरित्यर्थः। लघुत्वपदार्थांतरमित्यत आह। लघु
त्वमिति। नन्वन्येपि प्रमाणादयः पदार्थाः संति ते कुतो नोद्दिष्टा इत्यत आह। एवमिति। तेषामपि
द्रव्यादौ यथायथमंतर्भाव इति नाधिक्यमित्यर्थः। नन्वेवमंतर्भावे अपसिद्धांतमित्याशंक्य सूत्रेह
तोपि संमत इत्यत आह। तथेति। गुणगणनायां रूपरसगंधस्पर्शसंख्याः परिमाणानीति संख्यायोः
गुणेंतर्भाव इत्यर्थः। तद्वदपरेषामपीत्यर्थः। कारणत्वकार्यत्वाभ्यां विभागांतरमाह। एतेष्विति। नित्याना
माकाशादीनामनित्यानां द्व्यणुकादीनां कारणत्वकार्यत्वं विभजते। तद्येति। तद्य कारणं त्रिविधं त्रिःप्र २३

कारमित्यर्थः। समवायिकारणंतंत्वादि। असमवायिकारणंतंसंयोगादि। निमित्तंकुविंदादि। ननुमतस्सा
सहपृथिव्यादिचतुष्टयमूर्त्तंअन्यत्सर्वंअमूर्त्तंतेषामेवपंचानांक्रियावत्त्वंअन्येषांनिःक्रियत्वमित्यादयोभेदाः
कथंनोक्ताइत्यतआह। परइति। एवंद्रव्यगुणकर्मसामान्यविशेषसमवायानांपदार्थानांसाधर्म्यवैध
र्म्यतत्त्वज्ञानंनिःश्रेयसहेतुरितिसूत्रोक्तपदार्थानुद्दिश्यतच्छेषंव्याकरोति। एतेषामिति। उक्तानांपदार्था
नामित्यर्थः। तत्त्वपदस्यरूढार्थमाह। तत्त्वमिति। आरोपितशुक्तिरजतादावतिव्याप्तिवारणायानारोपि
तमितितस्यारोपितत्वान्नातिव्याप्तिः। ज्ञानपदार्थस्यानुभवपरतामाह। तस्येति। तदवांतरभेदमाह।
सचेति। अनुभवइत्यर्थः। श्रुतिःस्मृतीतिहासपुराणेषुश्रुतात्स्यार्थावधारणंश्रवणं। असंभावनाविपरी
तभावनानिरासेनयुक्तिभिरनुचिंतनंमननं। श्रुतस्यमतस्यतथैवसाध्यानंनिदिध्यासनं। इदमेव
मेवेत्यपरोक्षज्ञानंसाक्षात्कारः। एतल्लक्षणंस्वरूपमेवतस्यानुभवस्यसतथा। निःश्रेयसपदार्थमाह।

स॰टी॰मि॰ निश्रेयसं पुनरिति समस्तानां दुःखानामभावः समस्तदुःखाभावः तस्य मिथ्याज्ञानस्य कार्याणि तत्कार्या
णि दुःखविशेषाः मिथ्याज्ञानं च तत्कारणं च तस्य प्रध्वंसः तेन समानमधिकरणमाधारो यस्य तत्कार्यस
मस्तदुःखाभावः स तथा। तत्त्वज्ञानोत्पाद्यश्चासौ मिथ्याज्ञानकारणप्रध्वंससमानाधिकरणतत्कार्य
समस्तदुःखाभावश्चेति कर्मधारयः तत्र तत्त्वज्ञानोत्पाद्यसमस्तदुःखाभाव इति निःश्रेयसपदार्थ
निरूपणं इतरस्य समस्तदुःखाभावसामग्रीकथनं तत्र घटाभावे मोक्षवारणाय दुःखेति। पद
श्चैहिकं दंडकादिजनितदुःखाभावस्य सुखे सुप्तौ च वर्त्तमानस्य दुःखाभावस्य च मोक्षत्वमाभूदिति स
मस्तेति पदं। एवमपि वक्ष्यमाणशरीरादिसमस्तदुःखाभावो विद्यते प्रलये तद्वारणाय तत्त्वज्ञानोत्पा
द्येत्युक्तं। प्रलये तु शरीरादेरभावोऽदृष्टादिनिमित्तजो न तत्त्वज्ञानोत्पाद्य इति नातिव्याप्तिः। ननु तत्त्वज्ञा
नस्य समस्तदुःखाभावोत्पादने किं द्वारमत आह। मिथ्याज्ञानकारणप्रध्वंसेति। तत्त्वज्ञानेन दुः २४

पदेपत्तदेवयथात्मा ।। नचसाध्येवैकल्पं दृष्टांतस्य एवंविधस्यादृष्टस्यतत्रसमवायात् ।। स्वितस्यापकी
खस्पर्शाभादिसंयोगे ऽसिद्धसाधनतावारणायद्राहानुकूलेत्यादिविशेषणानि ।। अतींद्रियप्रति
बंधकाभावेनसिद्धसाधनतावारणायसमवायीति ।। एवंमानसिद्धाशक्तिः कुतोनोद्दिष्टा
इत्यतआह ।। शक्तिरिति ।। वाह्याद्यादिकारणस्वरूपमेवशक्तिः नपदार्थांतरमित्यर्थः ।। अनुमान
स्यात्मत्वमुपाधिः ननुअघटंभूतलमितिविशिष्टज्ञानंविशेषणविशेष्यसंबंधजन्यंविशिष्टज्ञा
नत्वात् दंडीतिज्ञानवदितिपरिशेषात्संबंधत्वेनैववैशिष्ट्यसिद्धिः तत्कुतोनोद्दिष्टमित्यतआ
ह ।। वैशिष्ट्यमिति ।। अघटंभूतलमित्यत्रापिस्वरूपसंबंधः सत्वानुतेनैवसिद्धसाधनमित्यर्थः ।। त ल
त्रापिसंबंधोविशिष्टबुद्धिहेतुः नतुविशेषणादयः सर्वेपितथासतिघटसेक विशिष्टबुद्धिप्रसंगात् ।।

स॰टी॰मि॰ प्रध्वंससंभवात्। आगामिशरीरादेस्त्वनुत्पन्नत्वेन ध्वंसासंभवात्। आगामिशरीरादिकमुत्पाद्य
ध्वंसेन तत्त्वज्ञानस्यापि दुःखजनकत्वप्रसंगात्। तस्मात्समस्तदुःखाभावो मोक्षो नोपपन्न इति चेन्न।
अत्रोच्यते। आगामिशरीराद्यनुत्पादनरूपदुःखप्रागभाववत्त्वं मोक्षः। तत्त्वज्ञाने हि तस्यागामिश
रीरादिकं नोत्पद्यते। निवृत्तस्यानुत्पाद्यत्वेनापुरुषार्थत्वं प्रायश्चित्तादिसाध्यदुःखानुत्पादनवत्।
तस्यापि परिपालनसंभवात्। तत्त्वज्ञाने हि सति दुःखकारणमिथ्याज्ञानादिध्वंसात्। प्रागभावस्या
नुत्तरकालसंभवरूपपरिपालनं संभवति। तत्त्वज्ञानाभावे हि दुःखकारणेन प्रागभावनाशात्तद्दुः
खोत्पत्तिरेव भवति। अतोऽन्वयव्यतिरेकाभ्यां प्रागभावपरिपालनं साध्यमिति तन्नापुरुषार्थत्वं। न
च समस्तदुःखप्रागभावासंभवः। समस्तपदेन शरीराद्येकविंशतिप्रकारस्य विवक्षितत्वात्। तस्य
चागामिनः एवं मज्ज्ञानत्वेन प्रागभावसंभवात्। न च प्रागभावस्य प्रतियोगिजनकत्वनियमात्तस्य २५

सांसारिकत्वाप्रसंगः इति वाच्यं। मोक्षस्य सोविरोधेन मोक्षरूपप्रागभावव्यतिरिक्तप्रागभावे प्रतियोगि
जनकत्वनियमस्य संकोचनात्। अन्यथा ज्ञापकस्मिन्नविवेरपि वैयर्थ्यापत्तेः। न हि नाश्यपापापूर्वं दुःखप्रा
गभावस्यापि प्रतियोगिजनकत्वनियमात्। मोक्षस्यास्त्वनु न स पुनरावर्त्तत इत्यमानेन वमावर्त्तनावर्त्तत इति।
पक्षा। चरमशरीरादिदुःखध्वंसो मोक्षः। चरमशरीरादिकं तत्त्वज्ञाने हि सति संचितकर्मक्षयाय भोगार्थं योग
जसामर्थ्यं गृहीतं कायव्यूहं शरीरादिमध्ये पदं तिमंत देवं अथवा अत्र शरीरादिकध्वंसः पूर्ववत् संभवतीति चेन्नान
त्वस्य चरमत्वाभावात्। चरमध्वंसस्वं च यत्रातिरेकाभ्यां तत्त्वज्ञानजन्यत्वेन। तथा हि। तत्त्वज्ञानेन हि मि
थ्याज्ञानध्वंसे इति तन्मूलकरागद्वेषयोरभावात्तदधीनधर्माधर्मसावनेपड्हे तदभावे च न हेतुकारणेन न
ज्जन्मादेरभावात् न च निमित्तदुःखस्यापि भावः। तथा च तत्त्वज्ञानसमानकालीनं शरीरादिकं
स्मो एव तत्त्वज्ञानाभावात्। अस्मदादेश्चरमदुःखध्वंसो नाद्यापि जनितः। येषां शुकादीनां शरीराद्यचना

त्मव्यतिरिक्तात्मेष्वेवं साक्षात्काररूपस्तत्त्वबोधः समभूत् तेषां चरमदुःखध्वंसोऽपि श्रुजनितदेहस्य व्यय
व्यतिरेकाभ्यां तस्य कारणता सिध्यति। अतो नात्र केचिद्दोषः मोक्षसाधनं तज्ज्ञानमेव। ज्ञाना
देवतु कैवल्यं प्राप्यते येन मुच्यत इति वचनात्। ननु कर्म। न तज्ज्ञानकर्मसमुच्चयः। कर्मणोऽमि
थ्याज्ञाननाशकत्वादर्शनात्। तज्ज्ञानमन्तरेण मोक्षासंभवात्। तत्त्वज्ञानस्य च रज्जुसर्पभ्र
मादौ मिथ्याज्ञाननाशकत्वदर्शनात्। न हि केवलं निकटोपसर्पणादिक्रियायत्नोऽपि तत्त्वज्ञा
नं विना सर्पभ्रमो निवर्त्तत इति सर्वमवदातं। किं तत्समस्तदुःखध्वंसरूपो मोक्षस्तत्र आह। दुःख
मिति। शरीरं प्रसिद्धं। षडिन्द्रियाणि। घ्राणरसनचक्षुःश्रोत्रत्वङ्मनांसि। तद्ग्राह्याः विषयाः रूपर
गंधरसस्पर्शशब्दस्पर्शसुखादयः। तज्ज्ञानानि षड्बुद्धयः। सुखदुःखे च प्रसिद्धे। तत्र शरीरादीनां दुः
खसाधनत्वात् सुखस्य च दुःखसंभिन्नत्वात् दुःखत्वं दुःखमुख्यमेव तु दुःखमिति विवेकः। माधवो

दि

स्वाभावेऽत्र नयित्नव्यो मिथ्याज्ञानप्रध्वंसोऽवान्तरव्यापारः। कारणकार्यपदाभ्यां मिथ्याज्ञानकारण
प्रध्वंसेन तत्कार्यदुःखस्यावश्यं ध्वंसो भवतीति निदर्शयति। देवदत्तमिथ्याज्ञानध्वंसेपि यज्ञदत्ते समस्तदुःखा
भावो नास्तीति समानाधिकरणेत्युक्तं। यस्मिन्नात्मनि मिथ्याज्ञानध्वंसस्तस्मिन्नेव समस्तदुःखाभाव इत्य
र्थः। ननु कोयं समस्तदुःखाभावः किं प्रागभावः उत प्रध्वंसाभावः आहोस्वित् अन्योन्याभावः। किं वात्यन्ताभा
वो वा। नाद्यौ। तयोरनुत्पत्तेरपुरुषार्थत्वात्। पुरुषस्तु साध्यो हि पुरुषार्थः। प्रागभावात्यन्ताभावयोरना
दित्वेनानुत्पाद्यत्वात्। समस्तदुःखात्यन्ताभावस्य समस्तदुःखप्रागभावस्य चात्मन्यसंभवात्। बहूनां दुःखा
नां तत्र निष्पन्नत्वात्। नापि अन्योन्याभावो मोक्षः। संसारदशायामपि दुःखान्मात्मा न भवतीति दुःखेन्यो
न्याभावप्रदर्शनात्। सुलभत्वप्रसंगात्। नापि दुःखप्रध्वंसो मोक्षः। समस्तशब्देन शरीरादेर्विवक्षित
त्वात्। तस्य चातीतस्य स्वत एव ध्वस्तत्वेन तत्त्वज्ञानमोपेक्षणात्। वर्तमानस्यैव पूर्ववत्कारणादेव

स्टी॰मि॰ इत्यर्थः। विशेषपदार्थेति व्याप्तिवारणायहेत्विति। अन्वयिनिनिरूपणाव्यतिरेकी सुकरः। अन्वयव्यतिरेकि
णि निरूपणापेक्षकेवलेति। जीवच्छरीरं सात्मकं प्राणादिमत्त्वान्निरूपणाय विशेषपदं केवलव्यतिरेकि
णि हेतौ विशेषत्वमसाधारणधर्मवचनत्वात् केवलव्यतिरेकी। पं यावपवोपपन्नः॥ लक्षणस्य तदभावा
कथं तत्त्वमिति। यथा शब्दानुमानेऽव्ययति। प्रयोगस्त्वि[illegible]लक्षणं पक्षः इतरेभ्यो भिद्यते इति साध्यं। लक्षण
व्यतिरिक्तसकलप्रतियोगिकान्योन्याभाववदित्यर्थः [illegible]तिरेकिव्याप्तिमाह। यदिति। धूमवत्त्वस्येतरसमव्या
पतितत्वाल्लक्षणनिष्ठेति भेदेऽयोगित्वात् न तु भेदावार[illegible]लक्ष्येतरेभ्यो न भिद्यते इति साध्याभावोऽस्ति हे
त्वाभावोऽस्तीति व्यतिरेकि दृष्टान्तत्वं धूमवत्त्वस्य व्यतिरेकव्याप्तेर्हेतोः पक्षनिष्ठत्वलक्षणं व्यतिरेकी
पपन्नमाह। तत्र नवेदमिति। किं तु भवत्येवेत्यर्थः। प्रतिज्ञानार्थविपरीतं। निरायफलकं निगमनमा
मात स्मादिति हेतुमत्त्वादित्यर्थः। सर्वेषु लक्षणेष्वितरभेदसाधनप्रकार एवमेवेत्यतिदिशति एव २७

मिति । पलक्षणत्वमेव हेतुं विधाय लक्ष्यमेव पक्षीकृत्य इतरभेदसाधनं व्यतिरेकिणा कर्त्तव्यमित्यर्थः
सामान्यलक्षणं विना विशेषलक्षणासंभवमाशंक्योक्तं स्मारयति । तत्रेति । तल्लक्षणेवृत्त्वे सति सा
मान्यलक्षणाक्रान्तमित्यर्थः । यद्यपि द्रव्यमिति विषयत्वेन पदार्थसामान्यलक्षणे स्वरूपकेवलान्वयि
त्वेन केवलव्यतिरेकी हेतुविशेषत्वाभावात् न [illegible] लक्षणशब्देनात्र पदार्थमात्रवृत्तिधर्मो
गोत्वादिस्साविवक्षितः । गुणश्चेत्तावन्मात्रवृत्ति[illegible]णं हि लक्ष्यमात्रवृत्तित्वे प्रमितिविषय
त्वमपि पदार्थमात्रवर्तितोऽन्तो गुणयोगाल्लक्ष[illegible] पदार्थशब्द[illegible] प्रवृत्तिनिमित्तप्रमितिवि
षयत्ववर्तते इति दृष्टव्यम् । ग्रंथकारेणोक्तस्यापि मुख्यत्वासंभवे गौणत्वमाश्रयणीयमेवेति ल
क्षणशब्दो गौणः प्रयुक्तोऽस्त्वित्यादौ । तां क्रमेण लक्षणमाह । द्रव्यत्वेत्यादि । सामान्यवत्त्वो गि
त्वं गुणत्वादावतिव्यापकमिति द्रव्यत्वेति । ननु द्रव्यत्वस्याभावरूपेण त्स्य वश्यं इत्यापोहनैवसक

स॰टी॰बि॰ लद्रव्यानुगतेन द्रव्यं द्रव्यमिति व्यवहारोपपत्तेरितिचेदं नवौद्धं निराकर्तुं सामान्यपदार्थं स्वपरा
रायो द्रव्यापोहस्य द्रव्यनिरूप्यत्वात् । प्रथमं द्रव्यव्यवहारोवक्तव्यः स चानुगतद्रव्यसामान्यं विना न सं
भवतीति तत्प्रथमं अभ्युपेयं । अन्यथा तदपोहे न द्रव्यानुगतो व्यवहारः । द्रव्यव्यवहारे सति वद्रव्यज्ञान
निरूप्यो द्रव्यापोहस्तोमिति इतरेतराश्रयत्वप्रसंग[illegible]स्यैवं सामान्यानां अभावः सामान्यमिति पदव्यु
त्पत्तेर्वस्तुवोधं एवमपि सामान्यपदस्य तात्पर्यं तेन द्रव्य[illegible]ति नेनास्तीति निवेदनं अभावकरो निरस्तो वेदित
व्यमिति समुच्चयं न द्रव्यत्वजातिः द्रव्यजकमाह गुणवत्समवा[illegible]रणं चेति । तस्य साधारणो व्याप्ते तत्स्तदा धार
गतो धर्मो व्यञ्जकः यथा गोत्वस्य सास्नादिमत्त्वं गुणत्वं समवायिकारणत्वं चेद्रव्यत्वस्य व्यञ्जकं । यत्र यत्र गु
णवत्त्वं तत्र तत्र द्रव्यत्वमिति सुपदेशः सह कृतेन तत्र लक्षणे कारणत्वं च द्रव्यत्वं प्रतीयते न द्रव्यस्य यं । प
दार्थनेद पिलक्षणद्वयमेव न वोद्धव्यं किं तु द्रव्यलक्षणमात्र गुणगरिहितं गुणत्वमव्यापकमिति वा ॥२७॥

स्वस्यस्वसारविनामितभाषिणीनञोदेशप्रकरणाख्याख्यागोचरतामिपानुक्तस्यैतोषव्याख्यायइदानी
उत्तरग्रंथसंगतिमाह॥इदानीमिति। एवकारेणपरीक्षाव्युदासः॥ किमर्थंलक्षणमेवोच्यतेइत्यत्रहेतुमाह।
लक्षणेतिलक्षणेनविनापदार्थानामितरव्यावृत्तिव्यवहाररूपतत्त्वज्ञानस्याभावात्। आत्मानात्मविवेका
भावात्। ननुअर्थलक्षणमेवोच्यतइत्ययुक्तम्। लक्षणमेव ... निमित्तंयस्यतस्यभावस्तत्त्वंतस्मादितिविग्रहः
लक्षणज्ञानायतल्लक्षणमाह। नचेति। नचैवमनवस्था ... लक्षणस्यलक्षणांतराभिधानादितिवाच्यम्। इ
दमेवलक्षणंसर्वस्यापिलक्षणस्यज्ञानंकुर्वत्स्वस्या ... लक्षणत्वेनस्वीतेपानात्। स्वज्ञानमपितत्त्वय
तिस्वाध्यायोध्येतव्यग्रमेयत्वादिवत्ज्ञानंतुस्वज्ञानायाईलक्षणांतरमपेक्ष्यते। येनानवस्थास्यात्। नन्वा
सामयेतिचेन्नाव्यवधानेनस्वतेवस्वज्ञानमात्माश्रयः। अत्रसर्वलक्षणद्वारास्वस्यापिज्ञानजन
यतीतिव्यवधानान्नदोषः। तस्माल्लक्षणज्ञानायलक्षणंवाच्यमितिनिर्णीयते। नचलक्षणानामध्य

यां कदाचिन्गुणत्वस्य लक्षणत्वात्। यद्वा गुणान्यतमाभावविरोधिमत्वं गुणत्वं विवक्षितं गुणान्यतमा
भावविरोधित्वं च गुणान्यतमाभावप्रागभावसामान्यतमत्वं लक्षणार्थः। तथाचोत्पत्तिसमये गुणप्रागभा
वोस्ति अतो नाव्याप्तिरित्यर्थः। एवं समवायिकारणेपि द्रष्टव्यं। न चातिव्यापकमुभयगुणादौ तु
भयाभावात्। गुणत्वज्ञाने व्यंजकमाह। जातिमत्वेति। जातिमदचलनात्मकासमवायिकारणत्वे
गुणत्वज्ञाने व्यंजकमित्यर्थः। यद्वा लक्षणान्तरं जातिरस्मिन्नस्तीति जातिमान् तस्य भावस्तत्वं तस्मि
न्सति चलनं कर्म न द्रव्यात्मकं न भवतीत्यचलनात्मकत्वे सति समवायिकारणसमवायिकारणत्वे
धर्मिणा धर्मो लक्ष्यते। तद्रहितं द्रव्यमित्यर्थः। गगनादिवदिति व्याप्तिवारणाय समवायेति। गगनादिवदकारण
मेव न भवति गुणस्तु कारणं भवति समवायिकारणं न भवतीत्यर्थः। समवायिकारणत्वेन रहितत्वं कर्मणि
न वर्तते अत उदासायाचलनात्मकत्वे सतीति कर्मं तु चलनात्मकमिति तद्व्यावृत्तिः। एवमपि सामान्यादौ
सत्वात् तद्वारणाय जातिमत्वे सतीति सामान्यादिकं तु द्रव्यं जातिरहितमिति न दोषः। कर्मलिङ्गं यवाति

सटी·मि·

वायिकारणाय द्वितीयतृतीयपदे।कर्मत्वजातेर्व्यंजकमाह।आद्येति।आद्योयोसंयोगविभागौसंयोगज
विभागजव्यतिरिक्तेतयोरसमवायिकारणत्वंकर्मत्वव्यंजकमित्यर्थः।चस्त्वर्थः।यत्नकाभावजकनिरासाय
यद्वालक्षणान्तरं च:समुच्चयार्थः।कारणमात्रमदृष्टादावतिव्याप्तिवारणायसमवायीति।एवंचरूपादौ अतिव्या
प्तिरूपादेरपित्वगादिगतस्पर्शादिगतरूपादिकंप्रत्यसमवायिकारणत्वात्।अत आहसंयोगविभागे
तिएवमपिआद्यसंयोगविभागयोरतिव्याप्तिः।तयोरपिसंयोगजसंयोगविभागजविभागंप्रत्यस
मवायिकारणत्वात्।आद्येति।आद्यसंयोगविभागकारणत्वेनतदाधारद्रव्येव्याप्तिरितितद्वारणायासम
वायीति।कारणपदंस्पष्टार्थं।सामान्यादिषुजात्यभावाज्जातिम[illegible]सेकेकर्मत्वलक्षणंतुतत्सामान्यलक्ष
यति।विसमिति।समवेतमित्युक्तेरूपादावतिव्याप्तिरतआह।अनेकेति।एतावत्युक्तेसंयोगेतिव्या ॥२७॥
प्तिरतउक्तंनित्येति।नित्यमनेकसमवेतमित्युक्तेनेकेषांविशेषाणामनेकसमवेतत्वंनि २८

स्पत्वं वास्तीति नवा तिव्याप्तिवारणाय एकमिति केचित्तन्नदपरेन सहं। नित्यसमवेतैकसमवेतत्वमित्येताव
तैव विशेषेष्विति व्याप्तिनिरासः। प्रत्येकं तेषु न तदभावात्। अत्र स्वरूपकथनायैवैकमिति। यद्वा। इ
दमेकं लक्षं इत्येकत्राहृनोच्यते। लक्षणान्तरं तु स्वयमूह्यं तुहस्तु समवेतत्वे सति विशेषान्यं निःसा
मान्यसामान्यमिति। विशेषलक्षणे एकव्यक्तिवृत्तिरित्युक्ते रसादौ अतिव्याप्तिवारणाय सा
मान्यरहितं इति समवायादौ तद्वारणाय एकव्यक्तिवृत्ति। रिति। नन्वनेकव्यक्तिवृत्तेरपि सामान्य
स्यैकव्यक्तिवृत्तित्वमस्त्येवेति तत्रातिव्याप्तिरिति चेत्। सत्यं। एकव्यक्तिमात्रनिष्ठत्वस्यात्र सम
वेतत्वस्य विवक्षितत्वात् न दोषः। समवायलक्षणे संयोगेतिव्याप्तिवारणाय नित्यसति।
गगनादौ तद्वारणाय संबंधे इति। न चात्माकाशसंयोगेतिव्याप्तिस्तस्य नित्यत्वादिवाच्यं तत्र स
तरकर्माभयकर्मणोस्तत्कारणयोरात्माकाशादावभावेन तयोः संयोगाभावात् तस्यानित्य

स·टी·मि· त्वेमानाभावाच्च द्रव्यत्वेन संयोगसाधने विभागोपि तेनैव सिध्येत्तथा च कुतः संयोगस्यानित्य
त्वमिति। अभावं लक्षयति। प्रतियोगीति। स्वाभावविरहात्माप्रतियोगिज्ञानाधीनज्ञानं यस्य स
तथा। अधीनत्वञ्च स्वत्वं ज्ञानाधीनज्ञानोऽभाववद्वस्तुके समवायेतिव्याप्तिः। तस्यापि सबंधिज्ञा
नाधीनत्वादत उक्तं प्रतियोगीति। इदानीमवांतरविभागानुक्रमेण लक्षणान्याह। पृथिवी
त्यादिना। पृथिवीत्वजातिव्यंजकमाह। गंधवतीति। गंधवत्वं पृथिवीत्वव्यंजकमित्यर्थः। यद्वा
लक्षणान्तरं। नच माणिवज्रादावतिव्याप्तिः। तत्रापि पाकजं रूपेण गंधवत्वानुमानात्। यद्वाव
त्मादिभस्मनि गंधवत्वोपलंभात्। तत्परमाणुपुंगंधवत्वमनुमीयते। तत एव वेद्योरसके इति तत्रा
पि गंधवत्वसिद्धिः। नच जलादौ अतिव्याप्तिः। तत्र गंधवत्वस्यवपकादिपार्थिवोपाधिनिमित्तत्वात्। अम्बुत्व
व्यंजकमाह। शीतस्पर्शाद्विति। शीतस्पर्शत्वं अम्बुत्वव्यंजकमित्यर्थः। यद्वा लक्षणान्तरं तत्र स्पर्शवत्वं पृ ॐ
थिव्यादावतिव्यापकमत उक्तं शीतेति। शीतत्वं चापद्वृत्ति उक्ते सामानाधिकरण्यात् गुणगुणिनोर

स.टी.मि. द्वेवसिद्धिः अन्यथा मनसो विभुत्वेप्यात्ममनोविभुत्वात्ताभ्यां सर्वपदार्थसंबंधात्युगपज्ज्ञानानि स्युः।बा
ह्येंद्रियतद्विषयासंबंधान्नेति चेत्तर्हि तद्विषयेंद्रियाणां युगपत्संबंधे ज्ञानयोगपद्यापत्तिः। दृष्टमे
वैतद्दीर्घशष्कुलीभक्षणादाविति चेत्तन्न। व्यासंगस्थले क्रमदर्शनेन तत्रापि क्रमानुमानात् यौगपद्य
प्रतीतेर्भ्रांतित्वात्। व्यासंगो नाम मनसोऽन्यासक्तत्वं तत्र हि रूपादिसकलविषयसंबंधेऽपि शब्दमश्रौ अणुत्वे तु ५
षं रूपं नाद्राक्षं गंधं नाघ्रासं नान्वभूवं स्पर्शो नास्पर्शीति सर्वानुभवात्। येनेंद्रियेण मनः संबध्यते तेनैव ज्ञान
जायते नान्येनेति युक्तो यौगपद्याभावः। अतः सिद्धं क्रियावत्त्वं मनसः। गुणावांतरभेदानां क्रमेण ल
क्षणानि दर्शयन् रूपं लक्षयति रूपत्वेति। एवं च लक्षणमेकं तु जातिव्यंजकं भिन्नमेव। एवं सर्वत्र विज्ञे
यम्। अथवा लक्षणांतरं रसादिवृत्तित्वे सति इंद्रियमात्रग्राह्यगुणवृत्तिजातिनिरूपत्वे तद्योग्यः। सपक्षः लक्षण
पक्षे गुणत्वं तु चक्षुरिंद्रियधर्मोऽस्तीति व्याप्तिः। तद्व्यावर्तनाय ग्राह्येति गुणो रूपमित्युक्ते रसादौ चेत ३२

मेद्भ्रमस्याचक्षुर्ग्राह्यस्पर्शेति। एवं शीतस्पर्शो यासांइति बुह। श्री हिणो भेदप्रतीतेर्नाभिदमभावो भव
ति न च चंद्रेतिव्याप्तिः। तत्र हि चंद्रमंडलारंभकावयवोपष्टंभजलावयवगतशीतस्पर्शस्य संयुक्तसमवायात्।
प्रतीयते। स तु स्वाभाविकशैत्यान चोह्लादकेव्याप्तिः। तत्रापि वह्निस्पर्शेण तस्याभावात्। बलवत्तस
जातीयसंबंधस्याभिभावकत्वात्। एवं तेजोलक्षणेपि द्रष्टव्यं। न च तेजोलक्षणे चंद्रसुवर्णादावति
व्यापकं। चंद्रे जलस्पर्शाभिभूतस्य सुवर्णादौ तु पार्थिवस्पर्शाभिभूतस्योष्णस्पर्शस्य सत्त्वात्। वायु
त्वव्यंजकमाह। अरूपेति। अरूपस्पर्शवत्त्वं व्यंजकमित्यर्थः। पद्यलक्षणांतरं। तत्र स्पर्शवत्त्वं तेजःप्र
भृतिष्वतिव्यापकं। अतो रूपेति। अरूपत्वे आकाशादावतिव्याप्तिः। अतः स्पर्शवानिति। आकाशादि
चतुष्टयस्पर्शाभावात्। एकैकमेव लक्षणमाह। शब्देति। आत्मादावतिव्याप्तिवारणाय शब्देति। शब्दव
दित्सु केन दोषः। तथापि तस्याभावेमते सिद्धद्रव्यत्वस्य निरासाय नैमगुणत्वसूचनाय गुणपदं शेषं।

॥स॰टी॰मि गुणः बहिरिंद्रियव्यवस्थाहेतुत्वात् रूपवत्। इत्यत्र रसस्य गुणत्वसिद्धिरित्यर्थः। आदित्यपरिवर्त्तने
श्रीशिवायै सूर्यपरिस्पंदैर्वेनउत्पाद्ये ये परत्वापरत्वे तयोरसमवायिकारणं तयोरसमवायिकारणं का
लपिंडसंयोगः तदाधारद्रव्यस्यार्थः। अनधिकरणे कालद्रव्यस्य के असंभवः एकालस्यापि द्रव्यत्वाधि
करणत्वात्। यद्वा घटत्वानधिकरणे पटे व्याप्तिः तत्र तत्र कं परत्वापरत्वेति। तयोः पिंडनि
ष्ठत्वेन कालस्य तदनधिकरणत्वात् वा वस्तुके समवायेन व्याप्तिः तत्तत्र के आधारे इत्येव
वकर्मण्यव्याप्तिः। न दर्शकारणे तथा च निवृत्तिस्तस्यापि ज्ञानकारणकर्मत्वाधारत्वात्। ततो वार २
समवायीति कर्मण्यस्य कर्मत्वाधारत्वे समवायिकारणत्वान्न दोषः। असमवायीत्याद्युक्तेग
गनादावव्याप्तिः तत्र च कंपरत्वापरत्वेति नावत्तुके दिक्पिण्डसंयोगः। अतत्र के आदित्येति।
एतावतैव पिंडे व्याप्त[illegible]तः अपेतनपदं परत्वाद्येव परत्वाभिन्नमपरत्वाभिन्नंलक्ष ३१

णदूयइत्थ व्यं। एवं दिशा लक्षणं लेपं एता वा स्तु विशेषः काले ति व्याहि वार ण स्यादित्य संयोगात्तु साधे
ति। आत्मा न लक्ष्यति। आत्मत्वे ति आत्म द्रव्यो मूर्त्त त्वस्य नाभावा प्रतियोगि द्रव्यता न्यजातिरात्मसामान्यं तदा
गीत्यर्थः। आत्मलक्षणव्यंजकमाह। बुद्धी ति। बुद्धिर्गुणो यस्य तस्य भावस्त्वं तच्चात्मलक्षणव्यंजकमित्यर्थः। यद्वा ल
क्षणांतरं तत्र गुणाभिसुक्ते अस्मदः गुणाश्रयत्वमित्युक्ते गगनादौ गच्छतीति तद्वारणाय बुद्धीति गुणेति
स्पष्टार्थः। अथवा बुद्धिरात्मेत्युमिद ध्वनतो बौद्धबुद्धिस्तु ह्यपगुणपदं तथा त्वेवाभनोऽनित्यत्वप्रसंगादिति। यद्वा
गुणवादि तिसामी न्य लक्षणानुगन्धोऽतनार्थे गुणपदं। मनसो लक्षणमाह मनस्त्वे ति। गगनादेश्चि
स्पर्शवत्वात्यंताभावाधिकरणक्रियावत्वं तिर्जाति मनस्त्वं तद्योगी त्यर्थः। [illegible] मनस्त्वव्यंजकमा
ह। स्पर्शेति। स्पर्शश्च न्यत्वे सति कर्माधारत्वं मनस्त्वव्यंजकमित्यर्थः। यद्वा लक्षणांतरं तत्र घटादि
वारणाय स्पर्शेति। गगनादिसुदासाय क्रियाधिकरणमिति। क्रियाधिकरणत्वं तु मनसोऽणुत्वा

गुणत्वे स्पर्शत्वव्यंजकमित्यर्थः। लक्षणपक्षे स्पर्शसमानाधिकरणगुणः। संयोगेपीति। तद्वारणाय यथाव्ये
निस्पर्शनमात्रग्राह्यत्वे स्पर्शलिंगानामपि द्रुतिन्नदर्थगुणद्वितिरोषपूर्वं च एतेषु चतुर्ष्वपि लक्षणेषु
नेत्रद्विन्द्रियग्राह्यगुणत्वावांतरजातिमत्वेमि. हृष्टार्थः। तेन परमाणुरूपादिषु नाव्याप्तिः। चक्षुर्ग्रा
ह्यगुणत्वावांतरजातिमत्रूपाद्यमुत्तरत्रापि द्रष्टव्यं। संख्यां लक्षयति। संख्यात्वेति। गगनसमवे
तसामान्यगुणत्वन्निम्नद्विष्ठगुणत्वविषरिमाणपृथक्त्वनिष्टात्यंताभावप्रतियोगितावच्छेदकी
भूतिचिन्नगुणत्वसाक्षाद्व्याप्यजातिः। संख्यात्वं जातिव्यंजकमाह। गणनेति। कारणसंख्येसुत्के
साधारणकारणेष्वरेच्छादौ प्रसंगः। ततोऽसाधारणेति। एवमपि परिमाणादौ प्रसंगः। ततो गणने
तिव्यज्जातीयेसतिव्यज्जातिजायतेनत्वस्या साधारणं कारणं। यथा तंतुपटस्पर्शयथा वा दक्षसंयोगा
दिः तथा गणनाजन्यसाधारणकारणं संख्या। ज्ञानं प्रति तु साधारणकारणं। संख्यां विनाऽन्य 22

स्मादपि घटादेर्न्नायमात्मलाभात्। संख्याज्ञानं प्रति संख्यायाः असाधारणकारणत्वेपि तस्याः गणनांप्र
त्यसाधारणकारणत्वं संख्याह न्यूनेति। उक्तलक्षणसत्वात्। न हि घटस्य रूपादिचतुर्दशगुणान्प्रति
साधारणत्वेति प्रत्येकमसाधारणत्वं त्वाह न्यूनेति। न हि घटसाधारणकारणमिति व्यवहरन्ति। तार्किकाः।
किन्तु ईश्वरेच्छादीनां साधारणकारणत्वे तेषां सदातनत्वेपि नत्वादिकं विना विशेषपदकार्यानुदयात्।
तस्मान्मुखज्ञानं प्रति हेतुत्वेपि गणनाऽसाधारणकारणत्वं संख्याया इति सिद्धं। परिमाणं लक्षयति
परिमाणत्वेति। संख्याः समवायिकारणत्वं अपेक्षाबुध्या साऽसाधारणकारणैकाद्वित्रिगुणत्वसाक्षाद्या
प्यातानि: परिमाणत्वं जातिं व्यंजकमाह। मानेति। मानमिति यत्नालक्षणपक्षे व्याख्यानं पूर्ववत्। पृ
थक्त्वं लक्षयति। पृथक्त्वेति। अपेक्षाबुध्या साधारणकारणासमवायद्वित्रिगुणवृत्तिसंख्यावृत्तिजातिः। पृथ
क्त्वेति। तद्व्यंजकमाह। पृथक्त्वव्यवहारहेतुरिदमस्मात्पृथगित्येवंरूपः। संयोगं लक्षयति। संयोगत्वेति। द्रव्यासमवा
यिकारणगुणवृत्तिसंयोगाभावाप्रतियोगिगुणत्वावान्तरजातिः संयोगत्वं। तद्व्यंजकमाह। कौचित्संयुक्ति

त·टी·मि·

लक्षणपक्षेसमवायेतिव्याप्तिवारणायअनित्यपदं।स्वरूपाद्वेतद्वारणायसंबंधपदं।विभागंलक्षयति।वि
भागत्वेति।क्रियासमवायिकारणवृत्तिइष्टगुणवृत्तिसंयोगावृत्तिगुणत्वसाक्षाद्व्याप्यजातिर्विभागत्वं।वि
भक्तव्यवहारहेतुरस्मादिहविभक्तमिति।असमवायिपदेऽर्थोपरत्वापरत्वेलक्षयति।परत्वेति।अपरत्ववृत्तिगुण
गुणवृत्ति ४ वृत्तिसकलपरत्ववृत्तिजातिःपरत्वं।परत्वावृत्तिसकलापरत्ववृत्तिजातिरपरत्वं।परापरव्यवहारोहेतु
नरूपाद्वेसंचिकृष्टविप्रकृष्टयोश्चपरापरप्रत्ययव्यपदेशौ।लक्षणपक्षेव्यावृत्तिःपूर्ववत्।बुद्धिल
क्षयति।बुद्धित्वेति।सुखावृत्तिसकलबुद्धिवृत्तिजातिर्बुद्धित्वं।एवमुत्तरत्रापिजातयोज्ञाप्याः।
लक्षणपक्षेआत्माश्रयइत्युक्तेसुखादावतिव्याप्तिवारणायानआह प्रकाशेति।वह्न्यादिप्रका
शेतद्वारणायआत्माश्रयइति।सुखंलक्षयति।सुखत्वेति।लक्षणपक्षेवेद्यंसुखमित्युक्तेदुःख
तत्साधनादावतिप्रसंगः।तदर्थमनुकूलेति।एवंसुखसाधनेप्रसंगः।तदर्थंनिरुपाधीतिनिरूपा ३४

उक्तं चक्षुर्ग्राह्य इति एवमित्युक्ते संयोगादावतव्याप्ति माऽभूदिति संयोगादेर्द्विरिंद्रियग्राह्यत्वान्न
न चक्षुर्मात्रग्राह्यत्वं रूपत्वे प्रसंगवारणाय गुणेति। इदमपि लक्षणं प्रभाकुड्यसंयोगेऽति
व्यापकं ततो विशेषगुण इति दृष्टव्यं तथा च चक्षुर्मात्रग्राह्यो विशेषगुणो रूपमित्यर्थः। यद्वा च
क्षुर्मात्रग्राह्य जातिमान् गुणो रूपमित्यर्थः। संयोगस्पार्शनत्वान्न संयोगे ऽतिप्रसंगः। रूप
इति जिह्वेंद्रियग्राह्य गुणो रस इति जातिमल्लक्षणं रूपादावतिव्याप्तिवारणाय रसनेति। रस
नग्राह्य रस इत्युक्ते रसत्वे इति प्रसंगः। तदर्थं गुण इति। पार्थिवं घ्राणेंद्रियग्राह्यगुणो गंध इति। स्पर्शे गंध इति जाति
६। गंधत्वे लक्षणे तु रसादावतिप्रसंगवारणाय घ्राणेति। गंधत्वजातौ तद्वारणाय गुण इति। स्पर्श
लक्षयति रूपत्वलक्षणावच्छेदकावच्छिन्नात्यंताभावाधिकरणविभुत्वोनाधिकरणाइत्यह हि
विशेषगुण इति गुणत्वावांतरजातिः स्पर्शत्वं जातिव्यंजकमाह। स्पर्शेति। स्पर्शनमात्रग्राह्य

धारणेति। शब्दं लक्षयति शब्दत्वेति। लक्षणपक्षे कर्मेति अतिव्याप्तिवारणाय मूर्त्तेष्वनिरूपणत्वेति
विशेषगुणत्वनिरूपणात्वेति जातिः शब्दत्वं। लक्षणपक्षे सुखादावतिव्याप्तिवारणाय श्रोत्र
ग्राह्येति। श्रोत्रग्राह्यत्वं शब्दत्वे पीति गुणत्वेति। गुणत्वेन प्रमाणमुक्त्वमेव। कर्मावान्तरभेदाननु
लक्षयति। उत्क्षेपणत्वेति। ऊर्ध्वसंयोगहेतुः क्रियात्वव्याप्यं कर्मत्वावान्तरजातिरुत्क्षेपणत्वं। एव
मुत्तरत्राप्यूहनीयं। अपक्षेपणादावतिव्याप्तिवारणायोर्ध्वदेशसंयोगेति। कारणमित्यु
क्तेउत्क्षेपणाधारस्ववृत्तिव्याप्तिः। अतः कर्मेति। उत्क्षेपणेतिव्याप्तिवारणायाधोदेश
संयोगेति। शेषं पूर्ववत्। विनश्यदवस्थइत्यगतेकर्मणिअव्याप्तिः कुञ्चनेतिव्याप्तिवारणाया
पादकमिति। अपक्षेपणाणादावव्याप्तिवारणायवक्रत्वेति। आकुञ्चनाधारेत्वहारणा ३६

त्विकमनन्यव्हारकत्वं सुखसाधनत्वं सुखव्हारे तेनानुकूलमिति नातिव्याप्तिः। न हि चंदनं निदाघे सु-
खसाधनमिति हेमन्तशिशिरयोरतीतानुषंगं नाम तु लिप्सनोऽदुःखलक्षणमिति दुःखत्वेति। लक्षणे पक्षे सुखा-
खादावतिव्याप्तिवारणाय प्रतिकूलेति दुःखसाधने हि कण्टकादौ तद्वारणाय निरूपाधीति दुः-
खसाधनदुःखव्हारे तेन प्रतिकूलमिति निलाचप्रसंगः। विषवैद्यैः सापादैर्दिग्धत्वमाणत्वाद्गुहातेषां
तस्य प्रतिकूलत्वाद्दर्शनादि ति इच्छालक्षयति इच्छात्वेति। अर्थयते प्रार्थयते इति निरूपयतिगुणे हादित्वात्क्षि-
तिः। तस्य भावोऽपि त्वप्रार्थयतेति यावत् निदेवलक्षणं स्वरूपं यस्याः सा तथा। स्पष्टयति इच्छलन। एव ‹न्यल ४›
मामास्वरूपं यस्य स तथा अग्नौ धरूपदस्यार्थः। प्रज्वलनात्मकं यथा अग्नौ वह्नौ दावस्तीति गुणप्रकरणाव-
गुणपदं सम्बन्धनीयमिति नातिव्याप्तिः। यद्वा अस्य गुणप्रकरणात्वात्। आत्माश्रय इति सम्बन्धनीय।
प्रयत्नं लक्षयति। प्रयत्नत्वेति। अहं प्रयते इति कारणमित्यादिव्यवहारः। प्रयत्नव्यवहारः शेषं सुगमं। गुरु-

त्वं लक्षयति। गुरुत्वेति। लक्षणपक्षे कारणं गुरुत्वमित्युक्ते दृष्टादावतिव्याप्तिः। अतोऽर्थे समवायीति। ए
वमुक्ते संयोगादावतिव्याप्तिरतस्तदुक्तं पतनेति। पतनं नाम सम्बन्धः संयोगध्वंसक्रियाविशेषः। क्रियायाः समवायिकारणमित्यर्थः। गुरुत्वमित्युक्ते नोदनादौ नोदनादि संयोगे पतनहेतौ वातिव्याप्तिरतस्तदुक्तं
एकवृत्तीति। एकवृत्तिरूपादावप्यस्तीति। एकवृत्तित्वे न कारणमित्युक्ते दृष्टादौ तत्रोऽसमवायीति।
द्रवत्वं लक्षयति। द्रवत्वेति। लक्षणपक्षे रूपादावतिव्याप्तिवारणाय स्यन्दनेति। स्यन्दनं प्रस्रवणम्। एवं
वमुक्ते संयोगादौ तद्वर्थमेकवृत्तीति। एकवृत्तित्वे स्यन्दनासमवायिकारणं चेति विग्रहः। स्नेहं लक्षय
ति। स्नेहत्वेति। लक्षणपक्षे द्रवत्वेऽतिव्याप्तिवारणाय द्रवत्वमूर्त्यादीति। द्रवत्वजातिमदधिकरणमित्य
र्थः। द्रवत्वमूर्त्यादिस्नेहत्वमित्युक्ते रूपादौ प्रसंगः तदुक्तं संग्रहेति। संग्रहो नाम चूर्णादेः पिण्डीभावः। दृष्टादा
वतिव्याप्तिवारणाय समवायिकारणेति। संस्कारं लक्षयति। संस्कारत्वेति। संस्कारस्य त्रैविध्यं वेगभावस्थान

स्थाप्यापादकः संस्कारो हि वेगो भावना स्थितिस्थापकरूपस्त्रिविधोऽपि स्वोत्पत्तिसमय एवापावस्थाद्
यस्यप्रतिपादयति। तत्र वेगश्च लक्षणावस्था भावना ज्ञानावस्था स्थितिस्थापको वेष्टनाद्यवस्थां प्र
तिपादयतीत्यर्थः। संस्कारत्वेऽपि वस्थापादकत्वे तेदोषाद्व्यस्याप्यस्तीति तद्वारणाय गुण इति।
गुणः संस्कार इत्युक्ते पारमाणविकल्पे तिप्रसंगः। तदर्थं मापादक इति। आपादकत्वे च रूपत्वं पारमा
णविकल्पानुपरमाणुपरिमाणेनाद्यकारणमिति न दोषो भवति। एवमपि सुखे पदार्थ स्वरूपापाद
कत्वेन तु संयोगादावतिव्याप्तिवारणाय वस्त्विति। एवमपि संयुक्तत्वावस्थापादके संयोगेतिव्याप्ति
स्तदर्थं गुणत्वेति। एवमपि रूपादौ अतिव्याप्तिरतस्त्वेति। धर्मं लक्षयति धर्मत्वेति लक्षणप्रक्षे
धर्मेतिव्याप्तिवारणाय सुखेति। सुखकारणं धर्मस्तु केईश्वरादौ प्रसंगः। तन्निरासाय कारणेति।
अधर्मं लक्षयति। अधर्मत्वेति। लक्षणपक्षे धर्मेतिव्याप्तिवारणाय दुःखेति। आत्मादौ वारणाय सा

पकर्मेति। इतरकर्मण्यतिव्याप्तिवारणाय कर्मत्वेति। शेषं पूर्ववत्। अन्यत्र कर्मण्येति व्याप्तिवारणाय नि
यतदेशेति। शेषं सुगमं। सामान्यभेदस्य लक्षणमाह व्यापकेति। अपरसामान्यादावतिव्याप्तिवार
णाय व्यापकेति। व्यापकमात्रं परमित्युक्ते गगनादावतिव्याप्तिः ततो वच्मि सामान्यमिति व्यापकसा
मान्यं परमित्युक्ते परापरेत तो मात्रेति। व्याप्यमात्रमित्युक्ते असंभवः तदर्थं सामान्यमिति। व्याप्यव्या
पकमित्युक्ते वह्न्यादावतिव्याप्तिरत उक्तं सामान्यमिति। शेषं सुगमं। विशेषसमवाययोरवांतरभेदा
भावात् अभावं लक्षयति। अनादिरिति। गगनादावतिव्याप्तिवारणाय सांतइति। घटादौ तद्वारणा
य अनादिरिति। रूपादावतिव्याप्तिवारणाय अनंत इति। आत्मादौ तद्वारणाय सादिरिति। अन्योन्या
भावे तद्वारणाय संसर्गेति। प्रागभावप्रध्वंसयोरतिव्याप्तिवारणाय अनादिरनंत इति। अनादिरन
तो भावोऽत्यन्ताभाव इत्युक्ते पुनरन्योन्याभावे अतः संसर्गेति। निषेध इत्युक्ते प्रागभावादावतिव्याप्तिः

स·टी·मि· वारणाय तादात्म्येति घटः पटो न भवतीति घटे पटतादात्म्यस्यारोप्य निषिध्यत इति तादात्म्यनिषेधद्
त्यर्थः। नित्यपरमाणुरूपे तत्र नित्यत्वं लक्षयति। नित्यत्वमिति। विरहो नित्यत्वमित्युक्ते नित्यत्वविरहो
नित्यत्वे नित्व्याप्तिरत उक्तं प्रध्वंसेति व्याप्तिवारणाय विरहेति। प्रध्वंसत्वं तत्प्रतियोगित्वं प्रध्वंसोल्लक्षि
तः सन्नो योगित्वं चेत्यर्थः। परमाणुं लक्षयति निरवयवद्रव्य इति। घटेति व्याप्तिवारणाय निरवय
वद्रव्य इति गगनेनतद्वारणाय क्रियावानिति मनसोप्यणुपरमाणुत्वेन लक्षयितत्वान्नातिव्याप्तिः।
यद्वा। मनोलक्ष्सोस्पर्शशून्यत्वेन विशेषणादत्र स्पर्शवत्त्वं विवक्षितं निरवयवस्यावयवनिरू
प्यत्वादवयवं लक्षयति। द्रव्येति। घटावति व्याप्तिवारणाय द्रव्येति। द्रव्यकारणमित्युक्ते ईश्वरादौ
ततः समवायीति। शेषं सुगमं। शरीरलक्षणे स्वावयविशानाय लतल्लक्षणमाह। द्रव्येति। यद्यपु
द्देशानन्तरं लक्षणस्यावश्यकत्वात् शरीरलक्षणानन्तरं भोगादिवद्रव्यत्वावयविलक्षयितुमुचितं तथो ३१

स॰टी॰मि॰ तेन दीयते धनस्वामी नन्दादिरित्यर्थः। एवमपीश्वरादौ प्रसंगः। तत्रोसाधारणेतिरुष्टव्यं॥ ज्ञायमानमिति प्र
टेन्द्रियादौ प्रसंगवारणाय तद्विशेषणं। ईश्वरादेरप्यनेनैव वचनेन व्यावृत्तिः। तदा गंधवत्वे सत्यभिनो भो
गसाधनं पार्थिवो विषयः। स्नेहत्वं स्यान्मनोभोगसाधनमाप्यो विषयः। इत्यादि स्वयमूहनीयं। तेजसो
विषयभेदानां लक्षणमाह पार्थिवेति। द्व्यणुकादावतिव्याप्तिवारणाय पार्थिवे धनमिति। इंधनं दी
पकः। एवं चोदर्येतिव्याप्तिरतो साक्षेति। तत्स्पर्शे तु तापि तादृशमये धनत्वान्न दोषः। तेजः पदाभावे निषाद
स्थपतिन्यायेन कर्मधारय एव स्यात्। न तथा चासंभवः। अतो न बहुव्रीहिसमासः। सज्ञापनाय तेजःपदं।
निषादस्थपतिन्यायस्त्वेवं॥ विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरः। प्रयोजनं च चक्रव्यं पूर्वसिद्धांत
पक्षयोः॥ इति पंचावयवाः॥ एतया निषादस्थपतिं याजयेत् इति श्रूयते। तत्र संदेहः निषादानां
स्थपतिः स्वामी निमित्ति षष्ठीतत्पुरुषः। उत निषादश्चासौ स्थपतिश्चेति कर्मधारयः। तत्र पूर्वः पक्षः ष ३५

३ ष्ठ्यापदव्यवच्छेद्यत्वेन प्राप्तत्वात् देहलीप्रदीपन्यायेनोभयत्रोपकार्यत्वे लक्षितत्वस्य दोषः। इत्यमंत्याव
यवीत्युक्ते परमाण्वादावतिव्याप्तिः अतः कार्येति। एवमुक्ते द्व्यणुकादौ ततो नारंभकेति। एवं चासंभवः अं
त्यावयविनाशशरीरादिनाशगतरूपादेरारंभकत्वादित्यत आह इत्यानारंभकमित्युक्ते रूपादौ ततो द्रव्य
मिति। द्रव्यानारंभकमित्युक्ते गगनादौ ततः कार्येति। प्रागभाववत्त्विति प्रागभावप्रतियोगिकार्यमि
त्यर्थः। अन्यथा कार्यत्वस्य तत्र प्रागभावाभावात् प्रागभाववत्त्वमसंभवि स्यादिति। भोगेति। भोग
स्य वक्ष्यमाणलक्षणस्यायतनं अंत्यावयवि तच्छरीरमित्यर्थः। अंत्यावयविशरीरमित्युक्ते घटादौ दो
तिव्याप्तिवारणाय आयतनेति। एवमप्यनिवृत्तिः तस्यापि यत्किंचिदायतनत्वात्। अतउक्तं भोगेति
। यदा तु वक्ष्यमाणलक्षणानुसार्यायतनशब्दः तदानेनैव व्यावृत्तिसिद्धौ भोगपदं स्वरूपकथनाये
वा यदा त्वायतनपदं आधारमात्रवाचि तदा सार्थकमिति मंतव्यं। अथवा वक्ष्यमाणलक्षणभोगाय

। स॰टी॰मि॰ । तत्स्यैवलक्षणंनायतनत्वमात्रस्येति भोगपदं सार्थकम्। गायतनमित्युक्ते मनस्यतिव्याप्तिः तदवच्छि
न्नेऽप्यात्मनि भोगजननात्। ततउक्तम् वयवीति। एवं च हस्तादावतिव्याप्तिरतउक्तमंत्येति। भोगलक्षण
माह। स्वेति स्व।स्मिन् भोक्तरि समवेते ये सुखदुःखे तयोरन्यतरस्य सुखस्य दुःखस्य वा साक्षात्कारः
स भोगः। साक्षात्कारो भोग इत्युक्ते घटसाक्षात्कारोपि भोगः स्यात्। अतउक्तं सुखेति। एवं दुःखसाक्षा
त्कारेऽव्याप्तिरतो दुःखेति। एवं चासंभवः। सुखदुःखयोर्युगपत्साक्षात्कारासंभवात्। क्रमेण तयोः साक्षा
त्कारानुगमः। उभयत्राप्यनुगतस्यैव धर्मस्याभावात्। अतउक्तं अन्यतरेति। अन्यतरत्वं तदन्या
न्यत्वं उभयत्राप्यनुगतमित्यर्थः। सुखदुःखान्यतरसाक्षात्कारो भोग इत्युक्ते ईश्वरसाक्षात्कारे
ततः स्वसमवेतेति। ईश्वरस्य शरीराद्यभावेन तज्जन्यादृष्टाभावात्। तदधीनयोः स्वसमवेतयोः
सुखदुःखयोरभावान्न तत्साक्षात्कारो ईश्वरस्येत्याशयः। आयतनस्य लक्षणमाह। यदवच्छिन्नेइ ३०

॥राम॥ ति। येन शरीरादिनावच्छिन्ने संबद्धे आत्मनि भोगो जायते। तच्छरीराद्यायतनमित्यर्थः। आत्मन्यतिव्याप्तिवारणा
य यदवच्छिन्नेति। शरीराद्यवच्छिन्ने अन्यत्र भोगाभावात्। असंभववारणाय आत्मनीति। इन्द्रियं लक्षयति साक्षा
त्कारीति। साक्षात्करोतीति साक्षात्कारि यत् ज्ञानं तस्य करणं साधकमित्यर्थः। करणमिन्द्रियमित्युक्ते छिदिक्रि
याकरणे कुठारादावतिव्याप्तिरतो ज्ञानेति। एवं च धूमादिलिंगेऽतः उक्तं साक्षात्कारीति। साक्षात्कारिणः
करणमित्युक्ते न कश्चिद्दोषः तथापि साक्षात्वधर्मो विषयनिष्ठो ज्ञाननिष्ठ इति मतं निरस्तुं ज्ञानसामानाधि
करण्यनिर्देश इति मन्तव्यं। निरासस्तु साक्षात्वस्य विषयनिष्ठत्वे घटसाक्षात्करोमीति ज्ञानमात्मत्वेनानुभवो
न स्यात्। व्यवसायेन तदाकारप्रसंगाच्चेति। यद्वा। साक्षात्कारपदं तु लक्षणं चक्षुरादावव्याप्तिवारणाय ज्ञा
नपदं भोगकारकविषय इत्युक्ते आत्मन्यतउक्तं आत्मन इति। आत्मनः सर्वथी भोगस्य कारणमित्य
र्थः। तथा चात्मातिरिक्तं कारणं प्रतीयते। तथा राजा धनस्वामी भट्टसेन इत्युक्ते राजातिरिक्तः प्रतीयते

ष्ठीसमासएवेति॥ तथा च निषादानां स्वामी कश्चित्स्थपतिर्यो ब्राह्मणादिर्योजनीयः। स च कर्मण्यधिकारी
अर्थित्वात्समर्थित्वाद्विद्वत्त्वादपास्युदस्लवाच्यः। कर्मधारये तु अनधीतवेदः शूद्रोधिकारी वाच्यः। न च्याच्यु
कं। अपशूद्राधिकरणविरोधात्तत्पुरुष इति प्राप्ते प्रत्युच्यते। षष्ठीसमासाश्रयणे षष्ठ्यर्थे लक्षणापत्तेः। ल
क्षणा हि जघन्या वृत्तिः। न च लुप्ता षष्ठी बोधयिष्यति। लोपस्याभावरूपतयाऽबोधकत्वात्। कर्मधार
ये तु न लक्षणा हि तीयायाः श्रूयमाणत्वात्। सामानाधिकरण्यश्रुतेर्बलीयस्त्वात्। प्रथमपदस्यो
पस्थितत्वादिन्नविभक्तिः न श्रूयत इति चेत्। अभेदे हि विशेषणविशेष्ययोरेकैकविभक्तिः श्रूयमाणा
उभयत्र सेव भाते। अतो नाश्रुतविभक्तिकल्पनापातः कर्मधारये त्वन्नातेऽश्रुता षष्ठी कल्पनीया। तो
गौरवं। न चाध्ययनासंभवादनधिकारो निषादस्थपतेः नवविधिबलादेवाणतोदृष्टो यावदपेक्षितपठ
नानुज्ञानात्। यथा वर्णसु रथकारोऽग्न्याधानं धीतेत्यनेन वाय शूद्राधिकारविरोधः। तस्य स्थपति

न्निषादव्यतिरिक्तत्वेनापि पर्यवसानात्सामान्यादिष्वग्नेस्तस्य बलीयस्त्वात्तस्मात्कर्मधारय एव लाघवात्स्वप
तिनिषादएवेत्येतन्न्यायज्ञेतिसिद्धं। याजनस्याद्वितीयत्वेन प्राशस्त्यात्। याज्ञये दिनिविभक्तिविपरिमा
णात्तुतेज्ञोदिव्यमित्युक्ते भौमादावतिव्याप्तिरतउक्तं जलेन्धनमितिएव वर्द्धयतिव्याप्तिरतउक्तमा
त्रेति। शेषपूर्ववत्। पूर्वोक्तयोरुभयोरतिव्याप्तिवारणाय पार्थिवजलेन्धनमिति। सुगमन्यत्। तेज
आकरजमित्युक्तेऽन्यत्रातिव्याप्तिरतोनिरिन्धनमिति। आकरजस्य स्वरूपमाह। नन्वेति। आदिप
दात् रजततान्नकांस्यत्रपुसीसादयो ग्राह्याः। अपाधिकं कालभेदस्य लक्षणमाह सकलेति। यौ
गपद्यमित्युक्ते घटपटयोर्यौगपद्यमुत्पत्तिः स्यादतउक्तं कारणेति। हिज्ञाणाकारणानामेलनेति
व्याप्तिरतउक्तं सकलेति। ननु यौगपद्यं कथमुत्पत्तिः नहतरंभावित्वादुत्पत्तेरिति चेन्न। उत्पत्त्यनन्तरस्यात्म
लाभः। न तत्स्वलाभएवोत्पत्तिरतोयुक्तमुक्तं यौगपद्यमुत्पत्तिरिति यौगपद्यं लक्षयति। अनेकेषा

प्रागभावा

मिति। संबन्धो यौगपद्यमित्युक्ते घटपटसंबन्धेतिव्याप्तिवारणाय क्षणेति। एवं च एकस्यानेकक्षणसंबन्धेऽ
तेउक्तमेकेति। एवमप्येकस्यैकलक्षणसंबन्धेऽतोऽन्येकेषामितिप्रसंगात् क्षणे लक्षयति। विभागेति
विभागेनानुत्पाद्योयं विभागः कर्मजः तस्य यः प्रागभावः तेन संबद्धं यत्कर्म तत्तावच्छिन्नो यः कालः स
क्षणइत्यर्थः। कालक्षण इत्युक्ते सकलस्य कालस्य क्षणत्वापत्तिः तन्मा बच्छिन्नेति। एवं च क्षणोपहोरात्रा द
वतः कर्मेति। एवमपि द्वित्रिक्षणेषु कर्मयुक्तेष्वतः संबद्धेति तथापि घटसंबद्धेन कर्मावच्छिन्नेषु द्वित्रेषु क्ष
णेषु अतिव्याप्तिवारणाय प्रागभावेति एवमपि घटप्रागभावसंबद्धकर्मावच्छिन्ने निव्याप्तिरतो विभा
गेति तथापि विभागजविभागावच्छिन्नेक्षणचतुष्टये विभागानुत्पाद्येति। विभागानुत्पाद्यविभागप्रा
गभावविसंबद्धक्षण इत्युक्ते प्रागभावस्य बहुकालव्याप्तित्वात् तत्रातिव्याप्तिरतः कर्मेति। एतदुक्तं भव
ति। विभागः प्रागभावः कर्मपूर्वेवेपि वर्त्तते। कर्म तु विभागोत्पत्त्यनंतरमपि ततः क्रियोत्पत्तिसमये

स॰टी॰मि॰ विभागप्रागभावकर्मणोः संबंधः तदाधारः क्षणः क्षणइति। अथवा कालोपाध्यापकः कालोपा
धिः क्षणइति। क्षणमात्रावस्थायित्वं क्षणिकमित्यपि प्रसंगादुक्तं। स्थितिं लक्षयति। स्थितिरिति। किं वर्त्तमा
नत्वं इत्यत आह। नचेति। प्राक्सत्वं ध्वंसाय स्वस्य घटादिकार्यस्याभावस्तेन रहितं यत्स्वरूपं तद्वत्वं वर्त्त
मानत्वमित्यर्थः। स्वरूपवत्वं विनाशोस्तीति ततोऽभावरहितेति। यस्य कस्याप्यभावरहितत्वं स्वरूप
वत्वं विनाशोप्यस्तीति ततो वाच्यं स्वेति। विनाशस्याभावो नास्याभावान्न दोषः। एवं सोत्पत्तीनाव। तियाभि —
रतोप्रध्वंसं बंध इति। उत्पत्तिस्तु सकलकारणयोगपद्यरूपा सा वर्त्तमानघटादेः प्रागभावसहितेवे
ति। नशब्दस्य बंधः स्वाभावरहितइति न दोषः। वर्त्तमानस्थितेर्लक्षणमाह। स्वकार्येति। प्रागभावसं
बद्धत्वं विनाशोप्यस्तीति कार्यपदं। एवमपि विनाशोत्पत्तावतिव्याप्तिरत उक्तं स्वकार्येति। स्वस्य कार्य
घटादेर्यत्कार्यरूपादि तत्प्रागभाववत्वमित्यर्थः। उत्पत्तिविनाशयोस्तु स्वनिष्ठकार्याभावाभावात्। ४३

समवायीति। संयोगजसंयोगेतिव्याप्ति तदर्थं कर्मेति। कर्मासमवायीत्युक्ते विभागेतिव्याप्तिरतोवक्ति संयो
गेति। संयोगासमवायिकारणसंयोगजइत्युक्ते पटादावतिव्याप्तिस्तस्यापि तंतुसंयोगासमवायिकारण
जन्यत्वात् अतः संयोगइति संयोगइत्युक्ते कर्मजे तिव्याप्तिस्तत्तोवक्ति संयोगासमवायीति। एवं विभा
गलक्षणेपिव्यावर्त्यदृष्टव्यं। तत्रफलपतनादावतिव्याप्तिवारणायविभागेति। आदित्यस्यपरिवर्त्त
नंतरणिपरिस्पंदः तेनोत्पाद्यइति विग्रहः। दिक्कृतेतिव्याप्तिवारणायादित्येति। आदित्यपरिवर्त्त
नोत्पाद्यदेशादिसंयोगेतिव्याप्तिवारणायपरत्वापरत्वमिति। आदित्यसंयोगानुत्पाद्यत्वरूपाद्य
पिसंभवतितत्तोवक्ति परत्वापरत्वमिति। कालकृतेतिव्याप्तिवारणायादित्येति। बुध्यवांतरभेदाल
क्षयति। भावनेत्यादिना। भावनासंस्कारः सोऽसाधारणकारणंयस्य तत्तथा। तज्जन्यंज्ञानमवेति वि
ग्रहः। ज्ञानंस्मृतिः इत्युक्ते अनुभवेतिव्याप्तिरतोऽसाधारणकारणेति। एवमपिअनुभवाव्याप्तिः। ४२

ज्ञान २

अनुभवस्यापि प्रमाऽप्रमारूपस्यगुणदोषासाधारणकारणत्वात्तोभावनेति। भावनाव्यवहा
रेतिव्याप्तिवारणाय ज्ञानेति। भावनाकारणस्मृतिरित्युक्ते प्रत्यभिज्ञानप्रत्यक्षेतिव्याप्तिस्तनोऽ
साधारणेति। प्रत्यभिज्ञानु इंद्रियसंनिकर्षासाधारणकारणिकेतिनदोषः। स्मृतिरूपादन्य
दस्मृतिरूपा। अनुभवलक्षणेपिघटादौस्मृतौचातिव्याप्तिस्तनोज्ञानास्मृतिरूपपदे। प्रमाणल
क्षणेपिघटादौसंभ्रयादावतिव्याप्तिस्तनोऽनुभवपदे। एवमप्रमाणलक्षणमपि। अवधार
णनिश्चयज्ञानंतदन्यदनवधारणंतज्जनज्ञानमितिविग्रहः। प्रमायामतिव्याप्तिवारणायान
वधारणेति। घटादावतिव्याप्तिवारणाय ज्ञानेति। ज्ञानंविपर्ययइत्युक्ते प्रमायामति
व्याप्तिः अतोऽतत्वेति। एवं वसंशयेतिव्याप्तिरतोऽनवधारणेति। अनवधारणमित्युक्तेप्रमा

नव ५

स०टी०मि० प्रमायामतिव्याप्तिः तद्वन्तत्त्वेति। अतत्त्वावधारणमित्येव लक्षणीज्ञानपदं स्पष्टार्थं। अज्ञायमानेक
रणमिन्द्रियं तज्जन्यत्वात् अनुभवत्वमिति विग्रहः। तत्त्वानुभव प्रत्यक्षे मितपुरोऽनुमितावतिव्याप्तिरतोऽज्ञायमाने
त्यादि। अज्ञायमाने चक्षुरादौ इन्द्रियसंयोगादाव अतिव्याप्तिरतत्त्वात्ऽनुभवत्वमिति। शेषं गतार्थं। प्रत्य
क्षप्रमायामतिव्याप्तिरतोऽज्ञायमाने ज्ञानीयमानकरणं शब्दलिङ्गादि तज्जन्यत्वमित्यर्थः। ज्ञायमा
नकरणधूमादिजन्यत्वमनुमाने निर्दिष्टं चाव्याप्तिः तत्त्वानुभवत्वमिति। शेषं सुगमं। प्रमां लल
क्षयति। प्रमायाः अयोगोऽसम्बन्धस्तेन व्यवच्छिन्नं रहितं यत्तत्त्वं प्रमाणमित्यर्थः। एवं चेश्वरेऽनि
त्यप्रमा सर्वस्यावरणाच्छिन्ना प्रमायामव्यवच्छिन्न ईश्वरोपि प्रमाणमिन्द्रियलिङ्गे अपि प्रमाले
तयोर्व्यापारवतो सन्निकर्षप्रमासन्नत एवेति प्रमायोगव्यवच्छिन्नत्वात्। प्रमाअव्यभिचारिप्र ४३

नत्वप्रागभाववत्त्वं इति चिनारालक्षणे स्पष्टं। नित्यज्ञानादिवत्त्वात् परमात्मनो लक्षणं स्पष्टमिति मत्वा
जीवस्य लक्षणमाह। शरीरेति। ईश्वरे तिव्याप्तिवारणाय शरीरसंबद्धेति। शरीरसंबन्धत्वं दुःखके
गगनादौ तेनतो ज्ञानवत्त्वमिति प्रत्यात्मेति। प्रत्येकमात्मनि समवेतो यो धर्माधर्मौ ताभ्यामुपगृही
तत्वं स्वीकृतत्वं प्रत्यात्मनिष्ठत्वमेवेत्यर्थः। उपगृहीतत्वं प्रत्यात्मनिष्ठत्वं दुःखकेऽव्यापगृहीतवस्त्रा
दावतिव्याप्तिरतो धर्मेति। एवं नारकशरीरे। धर्मेति। धर्मोपगृहीतदुःखकेवलादि शरीरे तस्य
केवलधर्मेण उत्पन्नत्वादतो धर्मेति। धर्माधर्मयोरेवाभावेन। धर्माधर्मोपगृहीतत्वाच्च सम्भवी
त्यत आह। प्रत्यात्मसमवेतेति। एकः सुखी अपरो दुःखी सुखदुःखयोः प्रत्यात्मनियतत्वात् तत्कारण
त्वेन धर्माधर्मौ व्यवस्थितावित्युपगन्तव्यावित्यर्थः। सितादयस्तु पर्यन्ता नानाजातीया योगित्वमेव लक्षणं। जाति
श्च कपिलाद्यनुभूति सकलसिद्धान्त जातिः सितत्वं। रत्यादिनानतयापुल्यादि। संयोगभेदं लक्षयति। कर्मास

य१ सै१

स·टी·सि· धिकरणेइति।व्याप्यमधिकरणं स्यात्तथा साध्यस्य साधननिष्ठः संबंध इत्यर्थः।एवं च सोपाधिके मैत्री
तनयत्वादिसंबंधेति व्याप्तिरनउपाध्यभावविशिष्टइति।व्याप्यव्यापकशब्दाभ्यां साधनत्वसाध्यत्वा
भिमतौ धर्मौ विवक्षितौ।पक्षधर्मतामाह।पक्षधर्मतेति।पक्षः सध ध·पक्षधर्मतेत्युक्ते पर्वतीयांवेति तै१ दौ१
व्याप्तिरतो व्याप्यस्येति।व्याप्यव्यापकयोर्लक्षणमाह।व्यापकमिति।सुगममिति मन्तव्यं।उपाधिल
क्षयति उपाधिश्चेति।अस्योदाहरणं मैत्र्याः सप्तमः पुत्रः श्यामो भवितुमर्हति मैत्रीतनयत्वात् परिदृ
श्यमाननमैत्रीतनयवदित्यनुमाने शाकाद्यन्नपरिणतिभेद उपाधिः।उपसमीपे स्थित्वा साधनेस्व
धर्मे व्याप्तिलक्षणमादधाति उपाधिरुच्यते।यथा जपाकुसुमस्य संनिहिते स्फटिके लौहित्यमादधा
तीत्युपाधिः।अत्र उपाधेर्लक्षणं योज्यते।साधनस्य मैत्रीपुत्रत्वस्याव्यापकत्वे सति साध्येतर श्यामत्वेन
समा व्याप्तिर्यस्य स तथा।तथा च यत्र यत्र नरे श्यामत्वं तत्र तत्र शाकाद्यन्नपरिणामः।यथा मैत्रीतनयश्या ॥४७॥

राम॥ मेपुत्रः तथा यत्र यत्र शाकाद्यन्नपरिणामः तत्र तत्र नरे श्यामत्वं यथा मैत्रीतनय इति साध्यस्य व्याप्तिः यथा यत्र
यत्र मैत्रीपुत्रत्वं तत्र तत्र शाकाद्यन्नपरिणाम इति न व्याप्तिः।पक्षीकृते मैत्रीपुत्रे शाकाद्यन्नपरिणतेः अनिश्च
यात्।ततोयमुपाधिः।व्याहतिरुक्तः साधनाव्यापकत्वपरिस्फुटः अनित्यः शब्दः कार्यत्वात्।घटवदित्यत्र सद
नुमाने सावयवत्वमुपाधिः स्यात्।भवति चायं साधनाव्यापकः स्यात् यद्यत्कार्यं तत्तत्सावयवमिति न व्या
प्तिः कर्मादौ व्यभिचारात् अनउक्ते साध्यव्यापके इति।एवं तत्र नातिव्याप्तिः सावयवत्वस्य साधनाव्यापकत्वे
पि साध्यव्यापकत्वाभावात्।यद्यदनित्यं तत्तत्सावयवमिति साध्यव्याप्तेः ध्वंसादौ व्यभिचारात्।अतः सावय
ले वत्वकार्येनोपाधिः साध्यव्यापकउपाधिरित्युक्ते पूर्वस्मिन्नेवानुमाने प्रमेयत्वमुपाधिः स्यात्।यदनित्यं त
त्प्रमेयमिति साध्यव्याप्तेः सत्वात्।अतउक्तं साधनाव्यापकत्वे सति।एवं च नातिव्याप्तिः यत्कार्यं तत्प्रमे
यं न भवतीति साधनाव्यापकत्वाभावात्।प्रस्तुतयत्कार्यं तत्प्रमेयमिति साधनव्याप्तेरिति सद्भावात्।

॥श्रीगणेशायनमः॥

त॰दी॰कि॰ अतःप्रमेयत्वंनोपाधिःसाधनाव्यापकत्वेसतिसाध्यव्यापकःउपाधिरित्युक्तेपूर्वानुमानेशब्देतरत्वंउपाधि
स्यात्तस्ययत्कार्यंतच्छब्देतरदितिव्याप्तेःपक्षेएवव्यभिचारेणसाधनाव्यापकत्वात्यदनित्यंतच्छब्देतरदि
तिव्याप्तेःपक्षेएवव्यभिचारेणसाधनाव्यापकत्वात्।यदनित्यंतच्छब्देतरदितिसाध्यव्यापकत्वाच्चेनतत्
समेतिकं साध्यपुरस्कारउपाधिपुरःसराचव्याप्तिःयथाशब्दघनपरिणतोशब्देतरत्वेतुचव्ययपिसाध्य
पुरःसराव्याप्तिरस्तितथापियच्छब्देतरत्तदनित्यमितिउपाधिपुरःसराव्याप्तिःनास्तिशब्देव्यभि
चारात्।अतःसमाहारभावान्नायमुपाधिः।साध्यसमव्याप्तिरित्युक्तेऽनित्यावृत्तिर्धिवीसावयवादित्य
त्रकृतकत्वमुपाधिःस्यात्।साध्यसमव्याप्तत्वात्।मेनतदुक्तंसाधनाव्यापकत्वेसतीतिकृतकत्वंचसावय
वव्यापकमितिनिसाधनाव्यापकमतोनोपाधिः।ननुनेनउपाधिःकथंहेत्वाभासत्वमितिःपक्षधर्मयोरन्य ४५
तरस्याभिचारनात्पथाविरुद्धानैकान्तिकाभ्यांव्याप्तिर्वर्तततथाशोकाद्यजपरिणामसङ्घातमात्रेण

५२

माणमित्यर्थः।यद्यपिप्रमायोगव्यवच्छिन्नत्वंसुखादावप्यस्तितथापिसाधनान्तरयोरन्यतरत्वेसती
तिविवक्षितमितिनदोषः।नत्रायोगव्यवच्छिन्नत्वमित्युक्ते।छिद्रायोगव्यवच्छिन्नेपरश्वादावतिव्या
प्तिरतउक्तमेति।प्रमाप्रमाणमित्युक्तेफलेतिव्याप्तिरतो।योगव्यवच्छिन्नेति।प्रत्यक्षलक्षणंसुगम
त्वादिदानाह।तज्जेति।अनुमानंलक्षयति।अनुमीतिरिति।प्रत्यक्षेऽतिव्याप्तिरतोऽनुमीतीति।अनु
मानस्वरूपमाह।तज्जेति।व्याप्तिपक्षधर्मताभ्यांविशिष्टंयत्लिङ्गंतस्यज्ञानमित्यर्थः।अनित्यः
शब्दःचाक्षुषत्वादित्यादिस्वरूपासिद्धव्याप्तिवारणायपक्षधर्मताविशिष्टेति।अनित्यः
शब्दःप्रमेयत्वादित्यनैकान्तिकेतिव्याप्तिवारणायव्याप्तीति।व्याप्तिविशिष्टलिङ्गज्ञानमित्युक्तेअ
नित्यःशब्दःसामान्यवत्त्वेसतिचाक्षुषत्वादितिविशेषणासिद्धेतिव्याप्तिःअतःपक्षधर्मतेति।व्याप्तिंल
क्षयति।व्याप्तिश्चेति।सबधोव्याप्तिरित्युक्तेयस्मिन्कस्मिंश्चिसबधेतिव्याप्तिःअतोव्यापकस्यव्याप्या

स.म.टि.४८ त्येवसंदिग्धोपाधिः।एवंनिषिद्धत्वस्यार्द्रेन्धनत्वादयोज्ञेयाः।इत्यलमतिविस्तरेण।केवलान्वयिहेतुंलक्षयति।पक्षव्यापक
इति।पक्षव्यापकः केवलान्वयी।उक्ते केवलव्यतिरेकिण्यतिव्याप्तिः।तदर्थंसपक्षस्पर्शीति।अनुमानेऽन्वयव्यतिरेकि
णि।अतोविपक्षशून्यइति।विपक्षशून्यइत्युक्ते सर्वंक्षणिकंसत्त्वादित्यनध्यवसितेऽतिव्याप्तिरतः सपक्षस्पर्शीति।विप
क्षशून्यःसपक्षस्पर्शीत्युक्ते शब्दोऽभिधेयःचाक्षुषत्वात्।घटवदित्यत्रातिव्याप्तिरतोवक्ति।पक्षव्यापकइति।चाक्षुषत्वं
स्यपक्षनिष्ठत्वाभावनदोषः।व्यापकपदेनैवअभिधेयःशब्दोवर्णात्मकत्वादितिभागासिद्धोपिव्युदासितः।एतत्त्रि
तयोक्तौवह्निरनुष्णःपदार्थत्वादितिबाधितेतिव्याप्तिरतोऽबाधितविषयइति।एवमभिधेयःशब्दःप्रमेयत्वात्अ
नभिधेयःशब्दःश्रावणत्वात्व्यतिरेकेणघटवदितिसत्प्रतिपक्षेऽतिव्याप्तिरतोऽसत्प्रतिपक्षइति।केवलव्यतिरेकि
णंलक्षयति।पक्षव्यापकःसपक्षशून्यइति।एतदुक्तेदेवःसर्वज्ञकर्तृकःचाक्षुषत्वात्यःसर्वज्ञकर्तृकोनभवतिस
चाक्षुषोनभवतियथाऽप्रसिद्धेप्रसंगः।अतःपक्षव्यापकइति।पक्षव्यापकइत्येवोक्तेकेवलान्वयिनिप्रसंगोऽ
तःपक्षशून्यइति।एतद्द्वयोक्तौसर्वमनित्यंसत्त्वादित्यत्रातिप्रसंगोऽविपक्षाद्व्यावृत्तइति।अयंतुविपक्षाभावान्नवि ४८

विपक्षव्यावृत्तः।विपक्षाभावश्चसर्वस्यपक्षीकृतत्वात्।एतत्त्रयोक्तौसर्वंकार्यंप्रमाणजन्यंकार्यत्वात्प्रत्यक्षवदितिबाधि
तेऽनुमानेप्रसंगः।अतोबाधितविषयइति।एवमपिवेदेसकार्यकं सर्वज्ञकर्तृजन्यंकादाचित्कत्वात्व्यतिरेकेणगगनव
सर्वकार्यंसर्वज्ञजन्यंनभवतिप्रमेयत्वादाकाशवदितिसत्प्रतिपक्षेऽतिव्याप्तिरतोऽसत्प्रतिपक्षइति।अन्वयव्यतिरेकि
णंलक्षयति।पक्षेति।पक्षव्यापकइत्युक्तेकेवलव्यतिरेकिणिप्रसंगः।अतःसपक्षस्पर्शीति।एतद्द्वयोक्तौकेवलान्वयि
निअतोविपक्षाद्व्यावृत्तइति।केवलान्वयिनिविपक्षाभावात्।नतद्व्यावृत्तिःपक्षाद्व्यावृत्तइत्युक्तेपुनःकेवलव्यतिरेकि
णि।अतःसपक्षस्पर्शीति।एतद्द्वयोक्तौअनित्यःशब्दःचाक्षुषत्वेसतिसामान्यवत्त्वादित्यत्रासिद्धभेदेऽतिव्याप्तिर
तोवक्ति।पक्षव्यापकइति।एतत्त्रयोक्तौपरमाणवोऽनित्याःमूर्त्तत्वात्घटवदित्यन्वयव्यतिरेकिणिधर्मिग्राहकमा
नबाधेऽतिव्याप्तिरतोऽबाधितेति।एवमपिशब्दःअनित्यःकार्यत्वात्नित्यःशब्दःश्रावणत्वादितिसत्प्रतिपक्षेऽतिव्याप्तिरतो
ऽसत्प्रतिपक्षेति।पक्षव्यापकत्वादित्रिनायपक्षादिलक्षणमाह।संदिग्धेति।संदिग्धसाध्यसत्ताकस्याभावस्कन्धेन
इत्थंभूतलक्षणेतृतीया।संदिग्धसाध्यवत्त्वेनोपात्तः।पक्षइत्यर्थः।उपात्तत्वपक्षत्वमित्युक्तेघटान्दावतिव्या

स.टी.मि. श्चितो विशिष्टानिष्टसाध्यवत्त्वे नेति। एवं च सपक्षो निश्चितसाध्यवत्त्वेनोपात्तो नावानुद्दत्तंभावनती। यथा मत्वर्थस्यो
कत्वात्। अतः संदिग्धेति संदिग्धत्वेनोपात्तत्वं रूपाणां दावनित्याश्रिसाध्यवत्त्वेनेति। अविकरणं सपक्षत्वमित्युक्ते
विपक्षेय स्यपक्षस्यापि अधिकरणत्वानिः अतः साध्येति। एवं च पक्षो निश्चितेति। निश्चितयस्साध्यं वह्निमत्या
दितस्याधिकरणआधारः सपक्ष इत्यर्थः। निश्चितं च तत्साध्यानधिकरणं चेति विग्रहः। अनधिकरणमित्युक्ते
सम्भवः विपक्षस्यापि यत्किंचिदधिकरणत्वात् अतः साध्येति। एवमुक्ते वह्निमानसौ पर्वतः धूमवत्त्वादित्यप्र
योगे महाह्रदे कदाचिद्वह्निमत्त्वमस्ति न वेति संदेहः तदानस्य विपक्षत्वं नास्तीत्यतिव्याप्तिस्तदर्थं निश्चिते
ति पक्षादीनां त्रयाणामपि तत्त्वेन निश्चितानामनुमितिजनकत्वात् साध्याभाववत्त्वेन निश्चित एव विपक्ष
इत्यर्थः॥ अर्थरूपमनुमानं स्वार्थं। शब्दरूपमनुमानं परार्थमित्यर्थः। पञ्चावयवोपेतत्वं च शब्दरूपत्वं। ननु शाब्दो नानुमानं वि
गानुसाधनमन्तरेण प्रमाजनकत्वात्। प्रत्यक्षवदित्याशङ्क्याह। शब्दस्यापीति। शब्दस्यानुमानत्वे कुतः अनुमानवि
षयत्वेन व्यविनाभावोपजीवकत्वेन वेत्यत्र यः अनुमानस्य विषयः परोक्षः स एव विषयो यस्य भङ्क्त्यस्तस्य भाव ४३

त्वे मैत्रीतनयत्वश्यामत्वयोर्व्याप्तिर्विघटिता न भवति नन्वयं यस्य साध्यव्यापकत्वे सति साधनाव्यापकत्वेनान्यस्य सा
ध्यव्याप्तिविघटनं प्रसंगान्नाप्रसिद्धिकालात्ययापदिष्टवत्पक्षधर्मतानिश्चयेन तेनोपाधिसचेपि मैत्रीपुत्रे हेतोः पक्ष
निष्टत्वादतो नायं दोषः इति चेन्न। एवं। व्यभिचारोन्नायकत्वेनोपाधेर्दोषत्वात्। तथा हि॥ साध्यस्य व्यापकउ
पाधिः पक्षाद्यावर्तमानः स्वव्याप्यसाध्यमादाय व्यावर्तते। व्यापकव्यावृत्तौ व्याप्यनिवृत्तेरावश्यकत्वात्। तथा
च साध्याभाववति पक्षे विपक्षरूपे वर्तमानो हेतुर्व्यभिचारी भवतीत्युक्तं। व्यभिचारोन्नायकत्वेनोपाधिर्दूषितविदो
षतामिति व्यभिचारोन्नायकत्वं च यत्र हेतुः साध्यव्यभिचारी साध्यव्यापकोपाधिव्यभिचारित्वात्। कोऽयं व्याप
कव्यभिचारी सन्नव्याप्यव्यभिचारी। यथा पृथिवीत्वव्यापकद्रव्यत्वव्यभिचारी गुणत्वादिः पृथिवीत्वव्यभिचारी
त्तिसामान्यतः विशेषतस्तु मैत्रीपुत्रत्वं श्यामत्वव्यभिचारी शाकाद्यन्नपरिणामित्वेन प्रसिचारित्वात्।
प्रमेयत्ववदिति विपक्षबाधकतर्कः शाकाद्यन्नपरिणामेन श्यामत्वं न्यायकशाखोदेव कार्यकारणभावावगमा
त्। कारणाभावे कार्यत्वासम्भवः। पक्षे हि तेन मैत्रीपुत्रे शाकाद्यन्नपरिणतेरनिश्चयेपि साधनाव्यापकत्वसंदेहाद्व

गुणानामुत्कर्षव्यापकत्वादिलक्षयति। अव्यापकत्वमित्यादिना। समानोदेशोस्यास्य तस्य भावः सादेश्यं। एकनिष्ठ
त्वमितियावत्। सादेश्यरूपरसादौवर्त्तत्यभावेति परत्वाभावसादेश्यं घटत्वेरस्पवर्त्तते एवेत्यतउक्तं स्वेति। एक
स्मिन्नेवतराव गुलीय योगतदभावौवर्त्तेतेइतिसंयोगोऽव्यापकः। एवंविभागसुखादिशब्दे बुद्ध्यादयः। व्यापक
लक्षणं सुगमं विहितादित्रयं सुगमम् एवजात्युपाध्योर्लक्षणमाह निर्बाधकमिति बाधकं तु व्यक्तेरभेदस्तु
ल्यत्वं संकरोथानवस्थितिः। रूपहानिरसंबंधोजातिबाधकसंग्रहः इति लीलावतीकारोक्तं व्यक्तेरभेद आका
शत्वादौ तुल्यत्वं इह घटत्वं कुंभत्वादौ संकरो भूतत्वमूर्त्तत्वादौ। तथाहि। भूतत्वं मूर्त्तत्वं विहायाकाशादौ वर्त्तते
मूर्त्तत्वं च भूतत्वं परिहाय वर्त्तते मनसि। तदुभयं पृथिव्यादिचतुष्टये वर्त्तते इति परस्परात्यंताभावसमानाधि
करणयोर्धर्मयोः सामान्यलक्षणं साकर्यं भूतत्वमूर्त्तत्वयोर्भवति। तदुक्तं। अन्योन्यपरिहारेणभिन्नयोर्यत्र कि
निर्विशिनोः। सामान्योः समावेशो जातिसंकरः। अतएव तदुभयं तु पाधिरूपसामान्यौ। अनवस्थितिर्जा

राम

णुपुरुषसंदेहेतिव्यापकश्चेतोऽनालिंगितेत्यादि। सुखं भेदौ लक्षयति प्रयत्नोत्पाद्येति। प्रयत्नोत्पाद्यसाधनं स्र
क्चंदनादि तदधीनं तज्जन्यमित्यर्थः॥ सुखं सांसारिकमित्युक्ते परामिमते नित्यसुखे तिव्याप्तिरत साधनेति
एवमुक्ते स्वर्गे तत्प्रयत्नेति। इच्छामात्रं न साधनमिति विग्रहः। साधनं साध्यतीं इच्छाधीनं साधनं साध्य
त्वं वा सांसारिके प्रसज्येतेति न द्वारणायमात्रेति। इच्छात्वं भेदं लक्षयति। सांसिद्धिकत्वादिति। सुगमं सुगमप्र
लक्षणद्वयं चैतद्वत्त्वमित्युभयत्रापि संबंधनीयं तेन गगनालोकयोर्न प्रसंगः॥ वेगभावनालक्षणे सुग
मे स्थित्यापादको गुणोऽपेक्षो। स्थित्यापादकः संस्कार इत्येवं ऽस्तिविभप्रस्थितस्थापकस्य लक्षणं दृष्टं वी
इत्येतिव्याप्तिवारणाय गुण इति संस्कार इति वा विशेषणं। अन्यथा पादकः संस्कार स्थितस्थापक इति के
चित्पाठः। स कुत्रैतज्जनकेऽव्यापक इत्युपेक्षणीयः॥ यस्मात् स्थित्यापादको गुणः संस्कारः॥ स्थितस्थापकरू
पेण विलक्षणे विभागे न दृष्टं बीजाच्छावांतरभेदानामनुगमानां लक्षणानि स्वरूपं निरूप्येव दृष्टव्यानि।

रणायसंबंधेति। उपनये: तिव्याप्तिवारणाय प्रयुक्तेत्यादि प्रयुक्तत्वं समभिव्याहृतत्वं। हेत्वाभासं लक्षयति॥ आगवेकृ
त्यमिति। आगानिपक्षधर्मत्वादीनितैर्वैकल्यं तहि तत्वमित्यर्थ:। अनिश्चितत्वेस्था दावप्यस्तीति तद्वारणाय पक्षवे
मत्वेनेति। क्वचिल्लिंगत्वेनेतिपाठ:। तत्रापि पक्षधर्मतेनेत्यर्थ:। पक्षविपक्षस्पर्शित्वमनैकान्तिकेप्यस्तीति तदर्थं सा
त्रेति। अनैकान्तिकानध्यवसितप्रकरणसमानां संदेहकार्यकर्तृकत्वे नसंदिग्धव्यपदेश इति हायवेति युगपदेवल
क्षयति। साध्येति। साध्यं च साध्याभावश्चानौ साध्यौ यस्य स: साध्यतदभावसाध्यकस्तस्य भावस्तत्वं। विरुद्धे सद
नुमाने चातिव्याप्तिवारणाय उभयसाध्यत्वमुक्तं। तत्र प्रमेयत्वस्यानैकान्तिकस्य साध्यतदभाववद्वृत्तित्वेन
उभयसाधनसंभवात्। अनध्यवसितस्य पक्षमात्रवृत्तित्वेनोभयसाधनसंभवात्। प्रकरणसमस्य साध्यतदभा
वयो: समत्वेनोभयसाधनसंभवात्। तथा चोभयसाध्यत्वं। अन्यतरनिश्चयाभावादेव संदिग्धत्वं। अपरं
च स्वयमूहनीयं। विस्तरभयान्नोच्यते। क्वचित्तु अनैकान्तिकानध्यवसितयो: पृथक् लक्षणमुच्यते। तदा संदिग्ध
त्ववत् रीत्यैव संप्रतिपक्षएव यात्यस्था। पूर्वपाठ एव तु सार्वत्रिकइष्टिकांतरसमत ... बाधं लक्षयति। उपजीव्येति। ४८

उपजीव्येन अधिकबलेन प्रमाणेन निश्चित: साध्यविपरीत: साध्याभावो यस्य तस्य भावस्तत्वं तत्कालात्ययापदिष्टत्व
मित्यर्थ:। साध्यविपरीतस्तत्वं संदिग्धे पर्वतेप्यस्तीति सदनुमानेतिव्याप्तिवारणाय निश्चितेति। छलनास्यादि ना
निश्चितसाध्यविपर्यये सदनुमानेतिव्याप्तिवारणाय प्रमाणेति। सत्प्रतिपक्षेतिव्याप्तिवारणाय उपजीव्ये
ति। तर्कं लक्षयति। अनिष्टेति। अनिष्टं व्यापकधूमाभावादिरूपं तस्य प्रसंजनं तर्क इत्यर्थ:। तं चोरत्वमपि
चोरत्वात् इमनानुज्ञायामितिव्याप्तिवारणाय व्यापकेति। महाह्रदे वह्निर्नास्ति धूमोपि नास्तीत्यादि प्रसंज
ने:तिव्याप्तिवारणाय अनिष्टेति। प्रसंजनं लक्षयति। तुल्यत्वेनेति। तुल्यत्वं नाम समानदेशकालाव नं
अभावयोर्व्याप्तिमत्वमिति। यावत्तत्र यदा वह्निर्नास्ति तत्र तदा धूमोपि नास्तीति प्रतीयते। एवं चाभावयोर्मू
योनुलात्वेन हेतुना यत्र अभाववचनेन प्रतिकूलोपवचनं तत्प्रसंजनमित्यर्थ:। तत्प्रभाववचनेप्रसंजनमित्युक्ते
यदि सुखं तर्हि दु:खमिति वचनेतिव्याप्तिवारणायातोभावयोरिति। एवमुक्ते यद्यमिनिर्नस्यात्तर्हि जलं न स्यादि
तिरीकोर्थे। तिव्याप्तिवारणाय रोपस्तु अन्यत्वेनेतिव्याप्याभावारोपेण व्यापकाभावारोप: प्रसंजनमिति रहस्यमभा

टी.मि द्वयोःप्रत्यक्षभावतमित्येतद्बाहुल्याभिप्रायेणवस्तुतायदिपानेजलं परमंतरधदृश्य रहितं तदविशिष्टमामपि दहेतुरित्यादौ या
द्वयोरपिप्रसज्जनस्यदृष्टत्वादिति। स्वप्नलक्षयति निद्रेति निद्रादोषेण यद्दुष्टमंतःकरणमनः तज्जन्यं ज्ञानं स्वप्न इत्य
र्थः। जागरे घटादिज्ञानव्युदासायांतःकरणजन्यमिति। जाग्रत्सुखादिज्ञानव्युदासाय दुष्टमिति। जाग्रज्ज्ञा
नस्वव्युदासाय निद्रेति। किं यं निद्रा नामेत्यत आह। योगजेति। योगाभ्यासेन जनितो यो धर्मः संयोगजस्तेना
ननुगृहीतस्यासहकृतस्य मनसो निरिंद्रियप्रदेशे बाह्येंद्रियसंबंधरहिते स्थले वर्तनं निद्रेत्यर्थः। समाधाव
तिव्याप्तिवारणाय योगजधर्मानुगृहीतस्येति। ग्रहणं निर्विकल्पकमित्युक्ते भ्रमेतिव्याप्तिवारणाय व
स्तुस्वरूपपदं एवं च सविकल्पकप्रमायामितिमात्रेतिदूरं इंद्रियादौ प्रसंगवारणाय ग्रहणमिति निर्विकल्प
केतिव्याप्तिवारणाय विशिष्टपदं। वस्तुग्रहणं प्रत्यभिज्ञेत्युक्तेऽभिज्ञायामितिरतोऽतीतेत्यादि। उत्तरलक्ष
णत्रयं सुगमं। ऊहनमूहनमिति व्युत्पत्त्योक्तलक्षणं स्पष्टमिति मत्वाऽनध्यवसायं लक्षयति अनालि
गितेति। अस्पष्टत्वमेकोटीयस्यानवधारणज्ञानस्य सोनध्यवसाय इत्यर्थः। अनवधारणज्ञानं स्था ४९

विषय२

मत्वेन शाब्देनेत्यर्थः। हेतोरनुपायान्तथा च शाब्दोऽनुमानं प्रमाणत्वे सति परोक्षत्वात् अनुमानवदित्यर्थः। न
या शाब्दानुमान अविनाभावोपजीवकत्वात् अविनाभावोपजीवनीत्यविनाभावोपजीवकः कथमिति चे
दुरत्येऽभिहितं ननु हया स्वर्गकाम इत्यत्र एतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि। आकांक्षा
योग्यतासन्निधिमत्पदत्वात् गामानयेत्यादि पद ------ पदार्थसंसर्गो वाक्यार्थः। स च अविनाभावबलेनैव रूपेण
शाब्दे भावगतः अतः शाब्दोऽनुमानमित्यर्थः। तथा च लिंगरूपेणैव शाब्दस्यार्थगमकत्वात् एवं पक्षे हेतुरसिद्ध इति दृष्टव्यो प्र
तिज्ञादीनां लक्षणमाह। तत्रेति। वचनं पक्षनिष्ठोऽनुक्ते घट इति वचनेऽतिव्याप्तिः अतः पक्षेति। पक्षधर्मवचनं हेतुरित्युक्ते
पर्वतो वह्निमानिति साध्यस्य पक्षधर्मतावचनेऽतिव्याप्तिरतो लिंगस्येति। शेषं पूर्ववत्। प्रतिज्ञादावतिव्याप्तिवारणा
य दृष्टांतेति। एवं च यथा गोस्तथा गवय इत्यादौ प्रसंगः तत्रोऽनुमानावयवत्वे सतीति प्रकरणात्। ज्ञानं वा। लिंगस्येति
व्याप्त्यनुपन्नतीय परामर्शस्तृतीयज्ञानं। वह्निव्याप्यधूमवानयमित्यादिव्याहृति स्पष्टा। लिंगसंबंधेन तस्मादित्येव
रूपेण प्रयुक्ते निश्चितसाध्यवचनं निगमनमित्यर्थः। प्रतिज्ञायामतिव्याप्तिवारणाय निश्चितेति। दृष्टांतेतिव्याप्तिवा

नैनात्व्यांगीकारेरूपहानि विशिष्टवत्वादौ असंबंधः समवायादौ। समवायेसमवायानंगीकारात्। एवंविधबाधकाभावे
यत्सामान्यं सा जातिः। बाधके तु औपाधिकं सामान्यमिति शेषः। अध्यारोपं लक्षयति आरोपितेति। घटो घटाभाववानिति वा प्रति
बारणाय नीलरूपइति। एवं सत्यसंभवइत्यत आरोपितेति। आरोपितेनीलरूपोऽयकारइत्युक्ते आरोपितनीलरू
पस्फटिकादौ अतिव्याप्ति स्यात्अभाववद्इति। ज्ञानसंबंधलक्षयति ज्ञानेति। ज्ञानलक्षण ज्ञानसंबंधः। तस्य लक्षणं
ज्ञानविषयत्वमित्यर्थः। ज्ञानविषयत्वेन प्रसंगेनप्रमाविषयत्वं लक्षयति। तत्वज्ञानेनेति। अवच्छेदकत्वव्याप्त तत्क
कैत्वविशेषणत्वविषयित्वमिति यावत्। शुक्तिरजतसंसर्गभ्रमेतिव्याप्तिवारणाय तत्वज्ञानेनेति। यथास
ख्यायाएव गुणे सु इत्यनेनसंख्या गुणांतर्भाविगुणादौ कथनद्यवहार इत्यत आह। गुणादिष्विति। संख्या
या सहगुणानीप्रत्यासत्तिः एकार्थसमवायलक्षणातं निबंधनस्य कारणइत्यर्थः। प्रकृतिमाह अत एवेतिव्यवहा
रस्येति शेषः। अतएव औपचारिकएवेत्यर्थः। कारणं लक्षयति। कार्येति। उत्पत्तेः सापेक्षत्वात्कार्यपदं कार्यो
त्पादक। समवायिकारणमित्युक्ते निमित्तादौ प्रसंगातः स्वसमवेतेति अवश्यं निश्चितं सामर्थ्यं यस्य तत्तथा।

एवंविधं च तत् समवायिकारणप्रत्यासन्नं चेति विग्रहः॥ अवष्टतेत्पाद्युक्ते समवायिकारणेऽतः समवायिकारणप्र
त्यासन्नमिति। एतावन्मात्रोक्तौ पटं प्रति तुरीरूपादेरसमवायिकारणत्वप्रसंगः। अतोऽवद्दे नेति समवायिकारण
प्रत्यासन्नत्वं द्वेधा कार्यकारणैकार्थसमवायात्। तत्र कार्यैकार्थसमवायो यथा तंतुसंयोगस्य पटेनैकार्थसमवा
यः। कारणैकार्थसमवायो यथा। तंतुरूपस्य पटरूपसमवायिकारणेन पटेन तंतुसमवायः। निमित्तकार
णस्य लक्षणं स्पष्टं। मूर्तत्वं लक्षयति। क्रियेति। इयत्तापरिच्छेदः अविभुत्वमिति यावत्। तेनावच्छिन्नं परिमा
णं तद्योगीत्यर्थः। आकाशेति व्याप्तिवारणाय प्रत्येकं वो। छिन्नेति। अमूर्त्तलक्षणं स्पष्टं। कारणप्रसंगात् सामग्रीं ल
क्षयति। कार्येति कार्यस्य प्रागभावः। असंबंधोऽत्र हि तौ अव्यवहितत्वात् व्यभिचारस्याद्वंसी सामग्रीत्यर्थः। सर्वलक्षणमूल
भूतमुद्देशं लक्षयति संज्ञेति। लक्षणेति व्याप्तिस्तत संज्ञामात्रेति एवमुद्देशलक्षणमभिधाय किंचित्साधर्म्यवैध
र्म्येन दर्शयन् गुणादीनां साधर्म्यमाह। रूपेत्यादिना। पृथिव्युदकात्मना चतुर्दश गुणा वाच्याः। तेजस एकादश गुणाः॥ ॥५३॥

त॰टी॰ ५

यसमवायिकारणेनिमित्तकारणनाशाश्चविरोधिगुणश्चेतिद्वेधाघटादिगतरूपादीनांसमवायि
नाशान्नाशः।संयोगविभागयोरसमवायिकारणयोर्नाशात्संयोगजसंयोगविभागजविभागना
शः।अपेक्षाबुद्धिनिमित्तकारणनाशात्परत्वापरत्वनिमित्तकस्यनाशःनाशाद्द्वित्वद्विपृथक्त्वा
दीनांनाशः।उत्तरशब्देनविरोधिनापूर्वशब्दस्यउत्तरज्ञानेनपूर्वज्ञानस्यदुःखादिनासुखादेर्ना
शइतिविरोधिगुणनाशः।कर्मणोनाशमाह।कर्मणइति।समवायिनाशाद्यथाविनश्यदवस्थद्रव्य
गतकर्मसमवायिनाशात्तज्जन्यकर्मनाशःउत्तरसंयोगाद्यथाशरादेरभिघातेनकृतकर्मनाशः।अभा
वस्यविनाशमाह।प्रागभावस्येति।अन्योन्याभावःकेषांचिन्मतेनित्यः।नहिपटेनष्टेपिदेतन्योन्या
भावोनश्यति।तद्वाविनष्टघटस्यपटतादात्म्यापत्तेः।अन्योन्याभावस्यतादात्म्याभावरूपत्वात्।त
थापितत्प्रतियोगिविनाशेसोपिनश्यतीत्यभ्युपेयम्।अन्योन्याभावस्यप्रतियोगिसत्त्वनिरूपणा ५२

न्यउत्पत्तिंनिरूपयन्नुत्पत्तिस्थितिरिति।उणस्यात्यंतस्पष्टम्।गुणस्यचेतिसमानजातीयंतुरूपादिपटादि
रूपस्यासमवायिकारणम्।असमानजातीयंद्व्यणुकपरिमाणंप्रतिपरमाणुद्वित्वंकारणम्।सुखादिक
स्यात्ममनःसंयोगः।संयोगविभागवेगानांचकर्मासमवायिकारणम्।साधारणनिमित्तकारणमा
हनिमित्तेति।आदिशब्देनदेशकालस्वेच्छयादि।अभावस्योत्पत्तिमाह।अन्योन्याभावेतिअभाव
स्यकापिसमवायिकारणाभावान्नसमवायिकारणम्।तदभावादेवतेनप्रत्यासन्नत्वलक्षणासमवा
यिकारणमपिनेति।केवलनिमित्तादेवोत्पत्तिरित्यर्थः।अत्यन्ताभावप्रागभावयोर्नोत्पत्तिः।यद्यप्य
न्योन्याभावस्यनोत्पत्तिःनहिघटरूपप्रतियोग्यनुत्पत्तावन्योन्याभावोनास्ति।तथाप्यनुत्पन्नोघ
टःपटोनभवतीतिप्रत्ययोनस्यात्तथाचघटउत्पन्नेपटोनभवतीतिस्पष्टंज्ञायतइतितदनुसारे
णोत्पत्तिरुक्ता।नन्वभावोनामनकश्चित्पदार्थोस्तियेनतस्योत्पत्तिविनाशविचारःकर्तव्योभवेत्

प्र.टी.मि तथा प्राभाकरः॥ भावांतरमेव भावापेक्षयाऽभावव्यवहारनिर्वाहकमिति यत्तु परं तु न व्यवहारविषयीपदार्थांतरम
५३ स्तिमानाभावाख्यो नास्तीति प्रत्यक्षेणाबाध्यव्यवहारान्यथानुपपत्तिर्वा तत्र मानमिति चेन्न प्रत्यक्षस्याथा
र्थापत्तेश्च भूतलादिभावालंबनतयान्यथासिद्धत्वात् नन्वनुनास्तीति शब्दप्रयोगः प्रदेशायोश्च तत्रालंब
नतायां घटवत्यपि भूतले भावघटीति व्यवहारो स्यादिति चेत् तस्मिन्नेव केवलभूतलस्याभाव
व्यवहारहेतुत्वात् घटवद्भूतलादन्यस्य भूतलत्वं केवलत्वं तत्र अन्योन्याभावो घटादिस्वरूपं सर्वत्र भूत
संसर्गाभावव्यवहारस्य कपाले भूतलादिना प्रवृत्तिकपाले प्रागभावप्रध्वंसाभावयोर्व्यवहारः। यत्तु नास्ति निःक्र
भावे किंचित्प्रमाणं। उच्यते। यथाहुः। भावांतरमभावो हि कयाचित्तु व्यपेक्षया। भावांतरादभावोन्यो न क
श्चिदनिरूपणादिति॥ अत्रोच्यते। अभावस्तावदतिरिक्तोऽभ्युपेयः। अन्यथा नास्तीति व्यवहारयोर
नालंबनत्वापत्तेः। तथा हि व्यवहारो व्यवहर्तव्यपदार्थज्ञानसाध्यः। न च घटादिस्वरूपं भूतलं वा व्यवहर्त ५३

वायोर्नव गुणाः। ईश्वरमनसोरष्टौ गुणाः। आकाशे षड्गुणाः। दिक्कालयोः पञ्च पञ्च गुणाः इति। इदमे
वाह बुद्ध्यादिसाधर्म्यं कर्माश्रयमाह कर्मेति मूर्त्तानामेव तत्साधर्म्यमितरापेक्षया वैधर्म्यमित्यर्थः। अ
थ पादेनैव भावत्वं निष्क्रियत्वं साधर्म्यं फलितमिति। न तु द्रव्यादीनां त्रयाणां साधर्म्यमाह। सामा
न्यमिति। इतरेषां निःसामान्यं साधर्म्यमुक्तं भवति। विशेषाणां साधर्म्यं वैधर्म्यं चाह। विशेषादि
तिसमवायाभावयोर्वैधर्म्यमाह। समवायेति। कार्यद्रव्यसाधर्म्यमाह। द्रव्यत्वेति। अकार्यद्रव्य
साधर्म्यमाह अकार्यमिति। द्रव्यादीनां विनाशं निरूपयति। विनाशस्त्विति समवायिनाशाद्द्रव्य
नाशो यथा तंतुनाशे सति पटनाशः। असमवायिकारणनाशाद्द्रव्यनाशो यथा परमाणुसंयोगनाशा
द्व्यणुकनाशः। गुणस्य विनाशं निरूपयति गुणस्येति। द्वित्वादेः श्रूयमाणस्यापेत्येकमभिसंबंधः। सप्तवा

र्थे किंच भावः तन्तुज्ञानं च तेन विना न संभवति। अतो भावो ज्ञानविषयोऽतिरिक्तोस्ति। निश्चयत्वादेर्नान्यथासिद्धिः॥
किंच भूतलादेरभावाधिकरणस्य प्रतियोगिकत्वापत्तिः। अभावस्य घटाभावः पटाभाव इति प्रतियोगिसापेक्षत्वात्। अ
पि चास्वरूपस्यान्योन्याभावत्वे दूरात्तरुसमूहे न पश्यति धिकतोऽयमैक्यानेक। जिज्ञासा न स्यात्। स्वरूपग्रहणे नै
व अन्योन्याभावग्रहात् रज्जावयं सर्प इति भ्रमो न स्यात्। स्वरूपग्रहणेनैव विशेषदर्शनस्य जातत्वात्। अवि
वेकाभावाभावश्च वेन्न भ्रमो मम मते सर्वज्ञानानां यथार्थत्वादिति चेन्न। रज्जुरियं सर्पो नायमिति समये निसक
नलोकानुभवबाधप्रसंगात्। लौकिकपरीक्षकसिद्धविभ्रमानंगीकारे गुरोरपि नष्टत्वापत्तेः। अपि च केव
लं भूतलमभावस्य तत्रैव किमिदं केवलत्वं नाम भूतलमात्रं चेन्न घटवत्यपि घटाभावप्रसंगात्। अथ भा
वाधारभूतलं चेन्न अभावस्वीकारापत्तेः। घटवद्भूतलाद्भिन्नभूतलं केवलमिति चेत् बोधासङ्केत् तत्र्यभावोपि
स्वीकृत एव। अभावाधारत्वं ज्ञानमन्तरेण घटवद्भूतलाद्भिन्नभूतलत्वज्ञानाभावात्तस्माद्व्यवहाराय

स.टी.मि. थानुपपत्याप्रत्यक्षेण धर्मातिरिक्तोऽभावोऽभ्युपगन्तव्यः॥ अतः स्वष्टोत्पत्त्यादिविचारः सफलः।न एवानुमानवलमा
वोधिकः। तथापि तद्ग्राहकं प्रमाणं किमिति चेत्। केचित् प्रत्यक्षं यथा इह भूतले घटो नास्तीति॥ केचित् अनु
मानेन यथा वह्न्यभाववज्ज्ञाने धूमाभावज्ज्ञानीननुकूलत्वाने घटाभावो न प्रत्यक्षेण इन्द्रियाभावयोः संबन्धानि
रूपणात्। अपितु योग्यानुपलब्ध्यैव संगृह्यते। इन्द्रियं त्वाधारमात्रपक्षीणं न तु सहितं ध्वंसस्यापि आधारत्वगि
गिन्द्रियेणास्त्वेव। अनिग्रहीते नीलरूपे प्रतियोगिस्मरणे नीलाभावग्रहणप्रसंगः। मम त्वं ध्वस्य प्रति
योगिग्राहकं नीलरूपग्राहकचक्षुषो नाभावानुमानाय प्रसंग इति चेत्। न। ममापि हि प्रतियोगिग्राहकेन्द्रियेणा
धिकरणग्रहणाभावात्। नातिप्रसंग इति चेत्। उच्यते। इह भूतले घटो नास्तीति ज्ञानमिन्द्रियजन्यं अ
परोक्षत्वात्। रूपज्ञानवत्। न चापरोक्षत्वमसिद्धम्। इन्द्रियान्वयव्यतिरेकि— — शीघ्रपिलेन तत्मासवनात्
श्रमतो नात्वैन्द्रियग्राह्यत्वासिद्धिः। न चेन्द्रियाभावसंबन्धाभावः। इन्द्रियसंबद्धभूतलविशेषणविशेष्यभा ५४

द्धेःकिंचभावःतन्नूज्ञानंचतेनविनानसंभवतीतिअतोभावोज्ञानविषयोनेतिरिक्तोक्तिः।निष्कृष्यत्वादेर्नान्यथासिद्धिः॥
किंचभूतलादेरभावाचेसप्रतियोगिकत्वापत्तिः।अभावस्यघटाभावःपटाभावइतिप्रतियोगिसापेक्षत्वात्।अ
पिचास्वरूपस्यान्योन्याभावत्वदूरात्तरुसमूहेनप्रमातिधिकतैर्ऐकानेकजिज्ञासानस्यात्।स्वरूपग्रहणेनै
वअन्योन्यभेदग्रहात्।रज्जावयंसर्पइतिभ्रमोनस्यात्स्वरूपग्रहणेनैवविशेषदर्शनस्यजातत्वात्।अवि
वेकाभावाभावाश्रयो वभ्रमोममतेसर्वज्ञानानांयथार्थत्वाद्धितिचेत्नारज्जुरियंसर्पोज्ञायिमयेतिसक
ललोकानुभवबाधप्रसंगात्।अलौकिकपरीक्षकसिद्धविभ्रमानंगीकारेगुरोरपिलघुत्वापत्तेः।अपिचकेव
लंभूतलमभावश्चेत्तेवकिमिदंकेवलत्वंनामभूतलमात्रंचेत्तर्हिघटवत्यपिघटाभावप्रसंगात्।अथाभा
वाधारभूतलंचेत्तर्हिअभावस्वीकारापत्तेः।घटवद्भूतलान्भिन्नभूतलंकेवलमित्युच्यतेचेत्तर्ह्यभावोपि
स्वीकृतएव।अभावाधारत्वज्ञानमंतरेणघटवद्भूतलान्भिन्नभूतलत्वज्ञानाभावात्।तस्मादपिव्यवहाराच्य

यथा हि। ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिना यागस्य स्वर्गादिसंबंधो बोध्यते। अतः साधनत्वेनाभिधायकं शा
स्त्रमित्यर्थः। तथानेकं द्रष्टव्यो वा निदिध्यासितव्येन कृतकेन वा पुंसा येनोद्दिश्यते तज्ज्योतिष्मभिधीयते इति शाब्द
बोहितत्वा—न्यादि दितिवाग्रंथस्य नामधेयं कुर्वन्न शास्त्रे संप्रेति। जंबूलक्ष कुशक्रौंचशाक ग्माल्मलिपुष्कर द्वीपाः इति स
प्तद्वीपा वसुमती सा तथा। भरतखंडविभागा बहूनि यावच्च सप्त धराधराः। कुलपर्वता महेंद्रादयः। तावत्कवनं आचंद्रा
कमिति यावत् इयत्सप्तपदार्थीव स्तूनां पदार्थानां प्रकाशिका स्फुरत्वा सद्ग्रंथा। गौराष्ट्रदेशे खिलराष्ट्रदेशे
सदाकरो दक्षिणभूमिनिष्ठः। विराजते सह्यगिरींद्रसानौ यत्रास्ति गोकर्णमहाबलेश्वरः। तद्देशजन्मा प
तिरेकदंडी स्वरस्वती मस्तक माधवाख्यः। सोयं शिवादित्यकृतेरकार्षीत् टीकामिमां बालसुखप्रवृत्त्यै॥ सर्व
वाख्यापतीडुज्झितेऽवत्कार्तिरनिवासिना॥ कृता सप्तपदार्थ्यास्तु टीकेयं मितभाषिणी॥ ० ॥ इति श्री मितभा
षिणी समाप्ता॥ ० ॥ ॥संवत् १६[illegible] समये श्रावण व दि अष्टमी लिखितं [illegible] ॥ ० ॥ शुभमस्तु॥ ५

१०० / ५

मितभाषिणी ग्रंथ १०

॥ रमापतिनार्जितं पुस्तकमिदं ॥

श्री.धोनकर

१३२

100 / 4